दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लद्वादशी
मार्गशीर्ष ०६ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-14 ■ वर्ष-6 ■ अङ्क-25 | 1 | नवम्बर 21, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदेहल्यां प्रथमस्य एस.सी.ओ. सभ्यताविषयक-संवाद-मञ्चस्य उद्घाटनं कृतम्

4 भाजपा-दलेन षट्षष्टि-विधानसभाक्षेत्रेषु (६६) नियुक्ताः प्रभारिणः, राजीवबिन्दलेन प्रकाशिता सूची

12 सार्वजनिकसंवादः : पारिवारिकगोपनीयता, आध्यात्मिक-प्रतीकानां मर्यादा, राहुलगान्धिः च- डॉ. मयङ्कचतुर्वेदी

प्रदेशस्य मुख्यमन्त्रिणा सह विधानसभायाम् अमिलत् संस्कृतशिक्षकाणां प्रतिनिधिमण्डलम्





मुख्यमन्त्रिणा प्रदेशे संस्कृतसम्मेलनं कर्तुं प्रदत्ता स्वीकृतिः

शिमला/कांगड़ाः हिमाचल-राजकीय-संस्कृत-शिक्षक-परिषदः एकः उच्चस्तरीयः प्रतिनिधिमण्डलः प्रदेशस्य माननीयेन मुख्यमन्त्रिणा सह शिष्टाचार-मेलनं कृतवान्। अस्मिन् अवसरे संस्कृतशिक्षकाणां दीर्घकालात् लम्बितानां प्रमुखयाचनानां शीघ्रनिराकरणाय एकं ज्ञापनपत्रं समर्पितम्। अनेन सहैव परिषदा प्रदेशस्तरे आयोज्यमाने संस्कृतशिक्षकाणां भव्ये राज्यस्तरीयसम्मेलने मुख्यातिथिरूपेण आगन्तुं माननीयमुख्यमन्त्रिणः समयः अपि याचितः।मेलनकाले प्रतिनिधिमण्डलेन मुख्य-मन्त्रिणः यशस्विनः कार्यकालस्य, भारतीयसंस्कृतिं प्रति तस्य सम्मानभावस्य च भूरि-भूरि प्रशंसा कृता। परिषदा अवगतं कारितं यत् हिमाचलस्य लोकसंस्कृतौ संस्कृतभाषायाः महत्त्वपूर्णं योगदानं विद्यते, तथापि प्रदेशस्य संस्कृतशिक्षकाः अद्यापि आर्थिक-पदलाभात् वञ्चिताः सन्ति। प्रतिनिधिमण्डलस्य नेतृत्वं कुर्वन् प्रदेशस्य राज्यसचिवः डा.अमनदीपशर्मा मुख्यमन्त्रिणे प्रदेशे संस्कृतसम्मेलनं कर्तुं किञ्च संस्कृतसम्मेलने आगमनाय निवेदनं कृतवान्, यस्मिन् विषये मुख्यमन्त्रिणा सहर्षं स्वीकृतिः प्रदत्ता। अस्मिन्काले प्रतिनिधिमण्डलं शिक्षामन्त्रिणा सह अपि अमिलत्। शिक्षामन्त्रिणा संस्कृतशिक्षकेभ्यः समयं प्रदातुं चर्चां कर्तुं च कथितम्।

परिषदा मुख्यमन्त्रिणः समक्षं प्रस्तुताः प्रमुखयाचनाः:

टी.जी.टी. (संस्कृत) पदनामानुरूपं पदोन्नतिः वित्तीयलाभः चः शिक्षाविभागस्य २०२२ तमस्य वर्षस्य अधिसूचनायाः अन्तर्गतं बी.एड्. (B.Ed.) तथा टैट् (TET) उत्तीर्णेभ्यः शास्त्री-भाषाध्यापकेभ्यः 'टी.जी.टी.' (TGT) पदनाम तु प्रदत्तम्, परन्तु तेभ्यः तदनुरूपं पदोन्नतिः वित्तीयलाभः च अद्यावधि न प्राप्तः। परिषदा एतेषां शीघ्रमपि प्रदानस्य याचना कृता।

वरिष्ठशास्त्रिणां कृते अतिरिक्त-वेतनवृद्धिद्वयस्य पुनः स्थापनम्: बी.एड्.-योग्यता-रहिताः सेवारताः प्राचीनाः शास्त्रीशिक्षकाः पदोन्नति-अवसराणाम् अभावे एकस्मादेव पदात् सेवानिवृत्ताः भवन्ति। तेषां मनोबलस्य आर्थिकहितानां च रक्षणाय पूर्वं प्रचलितं विंशतिवर्षीयसेवायाः अनन्तरं प्राप्यमाणम् अतिरिक्त-वेतनवृद्धिद्वयं (Increments) पुनः स्थापितं भवेत्।

विशेष-बी.एड्.-आरक्षणम् ये सेवारताः शास्त्रीशिक्षकाः स्वकीयां शैक्षणिकयोग्यतां वर्धयितुम् इच्छन्ति, तेषां कृते प्रदेशस्य विश्वविद्यालये विशेष-बी.एड्.-आरक्षणं निर्धारितं कृत्वा दूरस्थशिक्षामाध्यमेन (Distance Education) बी.एड्. कर्तुं सौकर्यं प्रदातव्यम्।

चयन-पदोन्नति-नियमेषु स्पष्टताः प्रदेश संस्कृतशिक्षायाः गुणवत्तां संरक्षितुं पारम्परिक-शास्त्री-उपाधिधारकेभ्यः अभ्यर्थिभ्यः एव वरीयता दीयेत तथा चयन-पदोन्नति-नियमेषु प्रचलितस्य विवादस्य समाधानार्थं विषयविशेषज्ञानाम् एका समितिः गठिता भवेत्।

प्रतिनिधिमण्डले उपस्थिताः पदाधिकारिणः

अस्मिन् शिष्टाचार-मेलनकाले प्रतिनिधिमण्डले प्रदेशमहासचिवः डॉ. अमनदीपशर्मा, राज्यमीडिया प्रभारी श्रीमान् कुन्दनशर्मा, कांगड़ाविभाग सहसंयोजकः श्रीमान् पुनीतशर्मा, कांगड़ा जिलाध्यक्षः श्रीमान् दीपकुमारः, कांगड़ाजिला महासचिवः श्रीमान् अनुष-उपाध्यायः, कांगड़ाजिला वित्तसचिवः श्रीमान् अमरसिंहः, पालमपुरखण्डप्रधानः श्रीमान् पङ्कजशर्मा, पालमपुर-खण्डमहासचिवः श्रीमान् नितिनशर्मा, धर्मशालाखण्डप्रधानः श्रीमान् उत्तमचन्दः च उपस्थिताः आसन्।

सुभाषितम्

न तथा बलवीर्याभ्यां जयन्ति विजिगीषवः।
यथा सत्यानृशंस्याभ्यां धर्मेणैवोद्यमेन च।।

भावार्थः- भावार्थः- विजय की इच्छा रखने वाले शूरवीर अपने बल और पराक्रम से वैसी विजय नहीं पाते, जैसी कि सत्य, सज्जनता, धर्म तथा उत्साह से प्राप्त कर लेते हैं।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्ररणा,
प्रचारगणः- जगदीश डाभी गुजरातम्, बृजेश कुमार पाण्डेयः, उ.प्र, सत्येन्द्रपाठकः उ.प्र, डा.विमलेश झा बिहारम्, डा.राघवनाथ झा बिहारम्, डॉ.पद्मनाभः हिमाचलम्, डा.निशिकान्त पाण्डेयः प.बंगाल, नवीन ममगाईं उत्तराखण्ड, कुलदीप मैन्दोला उत्तराखण्ड, डा.नवीनशर्मा हरियाणा, अजय कुमार आर्य पंजाब, ईशान तिवारी दिल्ली, रवि खरडिहालः कर्नाटक, डॉ.वर्षा टोणगांवकरः, सुधा साढवे महाराष्ट्रम्, ईदर धीरजः आन्ध्रप्रदेशः, नारद उपाध्यायः, डा.नयन ज्योति शर्मा असम

भारतस्य सप्तपञ्चाशत्तमः अन्ताराष्ट्रिय-चलच्चित्रमहोत्सवः गोवाराज्ये भव्य उद्घाटन-समारोहेन सह समारभ्यते



सप्तपञ्चाशत्तमः भारतीय-अन्ताराष्ट्रिय-चलच्चित्रमहोत्सवः गोवा-राज्यस्य तलेगाँव स्थाने स्थिते 'डॉ. श्यामा-प्रसाद-मुखर्जी-क्रीडाङ्गणे' भव्य-समारोहेण समारप्स्यते। अयं नवदिवसीय-महोत्सवः विश्वतः चलच्चित्र-निर्मातृन्, चलच्चित्र-कलाकारान्, एकस्मिन् मञ्चे आनेष्यति सदैव भारतीय-अन्ताराष्ट्रिय-चलच्चित्राणां वैविध्यं सम्माननियिष्यति। अत्र प्रतिष्ठित-स्वर्णमयूर-रजतमयूर-पुरस्कारेभ्यः स्पर्धमानानां विविधानां चलच्चित्राणां प्रदर्शनं भविष्यति। सञ्चार माध्यमानि सम्बोधयन महोत्सव-निदेशकः आशुतोष गोवारिकरः अस्मिन वर्षे 'सीमातिक्रान्ताः कथाः' इति विषयस्य महत्त्वं प्रत्यपादयत्। एतस्मिन् एतावत् इफ्फी इत्यस्य अङ्गत्वेन 'वेव्जचलच्चित्र-विपणः" इत्यस्य विंशतितमं संस्करणम् गोवा-राज्ये उद्घाटितम् ।

प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदेहल्यां प्रथमस्य एस.सी.ओ. सभ्यताविषयक-संवाद-मञ्चस्य उद्घाटनं कृतम्



प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्याः पुराना-किला-क्षेत्रे आयोजितस्य प्रथम-शङ्घाई-सहकार-सङ्गठनस्य सभ्यताविषयक-संवाद-मञ्चस्य उद्घाटनमकरोत् । अवसरेऽस्मिन् सः सभाम् अपि सम्बोधितवान्। त्रिदिवसीयं शाङ्घाई-सहकार-सङ्गठन-सभ्यताविषयक-संवाद-मञ्चस्य उद्देश्यं क्षेत्रस्य समृद्धां परस्पर-सम्बद्धां सभ्यताविषयक-परम्परां आचरितुम्, जनानां मध्ये सम्बन्धं सुदृढं कर्तुं, पारसांस्कृतिक-संवादं सहकारं च प्रवर्धयितुमस्ति । अस्मिन् मञ्चे भारतस्य पुरातत्त्व-कला-साहित्यपरम्परां प्रदर्शयन्तः अस्तित्व-द-एस्सेन्स-आफ-आवर-एक्सिस्टिन्स इति शीर्षकाधारितानि प्रदर्शनानि प्रदर्श्यन्ते। एतत् पुरातत्त्वसाक्ष्यैः दिल्ली-नगरस्य इतिहासस्य निमज्जन-विवरणं प्रदास्यति। अस्मिन् मञ्चे शनिवासरे रविवासरे च चत्वारः विषयाधारित-सत्राणि भविष्यन्ति, येषु विद्वांसः, शिक्षाविदः, विषयविशेषज्ञाः, सांस्कृतिकप्रतिनिधयश्च सम्मिलिताः भवन्ति । चर्चासु सङ्गीत-प्रदर्शन-कलाः, वस्त्राणि, पाकपद्धत्यः, पारम्परिकक्रीडाः इत्यादयः सांस्कृतिक अभिव्यक्त्यः समाविष्टाः भविष्यन्ति ।

बैड्मिण्टन-क्रीडायां लक्ष्यसेनः हाङ्ग क्राङ्ग-ओपन-क्रीडायाः पुरुष-एकलस्य उपान्त्यचक्रं प्राविशत्



भारतीयः क्रीडकः लक्ष्यसेनः कौलून नगरे सिङ्गापुर देशस्य पूर्वविश्वविजेतारं लोह कीनप्यू इत्यमुं विरुध्य क्रीडाचक्रे विजयेन सह हाङ्ग क्रोङ्ग ओपन बैडमिण्टन क्रीडायाः पुरुष एकलस्य उपान्त्यचक्र-मध्ये प्रविष्टवान् ।

पुरुष-क्रिकेट्-क्रीडायां, वेल्लिङ्ग्टन नगरे द्वितीयदिवसावसानं यावत् न्यूजीलैण्ड्-देशं विरुध्य एकस्य स्तोभस्य हानौ भारतेन एकोनषष्ट्युत्तरैकशतधावनाङ्कैः विरचिताः



वेलिङ्ग्टन स्पर्धायां भारतस्य सुदृढः आरम्भः। न्यूजीलैण्ड-दलस्य अष्टषष्ट्युत्तरत्रिशत-धावनाङ्कानां प्रत्युत्तरे भारतम् नवपंचाशदधिकैकशतधावनाङ्कान् समर्जयत् । जायसवाल-राहुल-इत्येतयोः प्रभावि-अर्धशतकैः भारतस्य स्थितिः श्लाघनीया जाता। शुभमन गिल-नेतृत्वस्य दले राहुलः उपनायकः, पन्त-बुमराह-जडेजाश्च प्रमुख-क्रीडकाः सन्ति।

सर्वकारीय-उपक्रमाणां कारणात् सम्पूर्णदेशे स्वास्थ्यसेवाः, चिकित्सा-शिक्षा च विस्तृता - राष्ट्रपतिः द्रौपदीमुर्मुः



राष्ट्रपतिः द्रौपदी मुर्मुः इत्येषा अकथयत् यत् विगतदशके सर्वकारेण स्वास्थ्यसेवायाः चिकित्साशिक्षायाः च विषये अनेकाः दूरगामिनः उपक्रमाः कृताः, येन प्राथमिकतः तृतीयक-परिचर्यापर्यन्तं सर्वेषु स्तरेषु स्वास्थ्यसेवायाः महत्त्वपूर्णः विस्तारः अभवत् । नवदेहल्यां अटल-बिहारी- वाजपेयी-आयुर्विज्ञान-संस्थानस्य अथ डा. राममनोहर लोहिया-चिकित्सालयस्य दीक्षान्तसमारोहं सम्बोधयन्ती राष्ट्रपतिः अवदत् यत्, सम्प्रति सम्पूर्ण देशे प्रायः एकलक्ष पञ्चसप्तति-सहस्राणि आयुष्मान्-आरोग्यमन्दिराणि सन्ति, येन ग्रामीणक्षेत्रेषु दूरस्थक्षेत्रेषु च जनेभ्यः प्राथमिक-स्वास्थ्यसेवाः प्रभावीरूपेण प्रदीयन्ते । राष्ट्रपतिः मुर्मुः अवदत् यत् उन्नत-स्वास्थ्य-सुविधाः, ये पूर्व बृहन्नगरेष्वेव केन्द्रीकृताः आसन्, अधुना टायर-2 अथ टायर-3 इति नगरेषु अपि प्राप्यन्ते। केन्द्रीय-स्वास्थ्य मन्त्री जगत प्रकाश नड्डा स्वकीये भाषणे उच्च-गुणवत्तायुक्त-स्वास्थ्यसेवाः प्रदाय, संशोधने, अङ्गदान अवाप्तये अन्येषु च विविध-शल्यक्रियासु उल्लेखनीय-लक्ष्याणि साधयितुमपि संस्थायाः प्रशंसाम् अकरोत् ।

अक्वान-चक्रवातः गोपालपुरं निकषा दक्षिण ओडिशा-प्रदेशस्य, उत्तर-आन्ध्रप्रदेशस्य च तटीयक्षेत्रं परिवेष्टयत

उत्तर-आन्ध्रप्रदेश-दक्षिण-ओडिशा-तटम अतिक्रान्तः 'अक्वन' इति चक्रवाती-झञ्झावातः उत्तर-ईशान-दिशं प्रति गत्वा परिवर्तितो जातः। भारतीय-ऋतु-विज्ञान-विभागेन प्रोक्तं यत अयं प्रभावः उत्तर-ईशान-दिशं प्रति गत्वा आगामिषु षट्सु होरासु, तदनन्तरवर्तीषु षट्सु होरासु च सुस्पष्ट-अल्प-भार-क्षेत्रे दुर्बलीभवितुं सम्भाव्यते। विभागेनानेन मत्स्यजीविभ्यः श्वः प्रातः यावत् पश्चिम-मध्य-बङ्गालोपसागरे उत्तर-पश्चिम बङ्गालोपसागरे च न गन्तुं परामर्शी प्रदत्तः। विभागेनानेन ओडिशा-राज्ये अतिवृष्टिपरा रक्त-वर्षीया संचेतना प्रसारिता। तटीय आन्ध्रप्रदेशे, गाङ्गेय-पश्चिम बङ्गाले, झारखण्ड-राज्ये च अयं अतिवृष्टिपरा नारङ्ग-वर्णीया-सचेतना प्रसारिता। छत्तीसगढ राज्ये पूर्वोत्तर भारतस्य केषुचित् भागेषु च अतिवृष्टिः अनुमीयते। विभागेन मध्यप्रदेशे, उप-हिमालय-पश्चिम बङ्गाले, सिक्किम राज्ये च मेघगर्जन-विद्युत्पातपुरस्सरं वृष्टेः अपि पूर्वानुमानं प्रकटितम् ।

मेघालय-राज्यस्य भोइरिम्बोङ्ङ्स्थाने स्थिते 'मदान-कुरकलाङ्ङ क्रीडा-सङ्कुले' 'शिलॉङ्ङ्च्चेरी-ब्लॉसम-महोत्सवः समारब्धः



मेघालय-राज्यस्य भोइरिम्बोङ्ङ्स्थाने स्थिते 'मदान-कुरकलाङ्ङ क्रीडा-सङ्कुले' 'शिलॉङ्ङ्च्चेरी-ब्लॉसम महोत्सवः समारब्धः। उद्घाटनावसरे विविधानां कला-प्रदर्शनानां सङ्गमो वर्तते, यत्र 'नेली' इति प्रमुखेषु आकर्षणेषु अन्यतमो वियते। अयं महोत्सवः स्थानीय व्यञ्जनैः, कला-प्रतिष्ठापनैः, परिधान-कलाभिः, अन्याभिश्च गतिविधिभिः मेघालयस्य जीवन्त संस्कृतिम् अपि प्रदर्शयिष्यति। नवम्बर-मासस्य विंशति-एकविंशति-दिनाङ्के प्रवर्तमानेऽस्मिन् द्विवसीय-महोत्सवे सङ्गीत-मनोरञ्जन-कला-व्यञ्जन-सांस्कृतिक-समारोहैः राज्यं समृद्धं भविष्यति, आदेशात् च वीक्षकाः समागमिष्यन्ति इति अनुमीयते।

अंशविपण्याः वार्ता

भारतीयशेयरविपण्यां तीव्रा वृद्धिः।

सेन्सेक्सः ८९८ अङ्कैः, निफ्टी २८६ अङ्कैः वर्धितः

हिमसंस्कृतवार्ताः- डॉ. विमलेशझा, मुंबई २० नवम्बर २०२६। शुक्रवासरे भारतीयशेयरविपण्यां प्रबलः उत्साहः दृष्टः। प्रातःकाले मन्दतया आरब्धः व्यवसायः अधःस्तरात् निवेशकानां क्रयणसमर्थनेन अन्ते महतीं वृद्धिं प्राप्तवान्। बीएसईसेंसेक्ससूचकांकः ८९७.९६ अङ्कैः १.०८ प्रतिशतं वर्धित्वा ८३,९१९.७१ अङ्कस्तरे समापितः। एनएसई निफ्टी-५० सूचकांकः २८६.३० अङ्कैः १.१२ प्रतिशतं वर्धित्वा २५,८००.६० अङ्कस्तरे स्थित्वा व्यवसायस्य समापनम् अकरोत्। प्रातःकाले भारतीय- शेयर- विपण्याः मन्दतया अधोगतिप्रवृत्त्या च व्यवसायम् आरब्धवन्तः। किन्तु न्यूनस्तरेषु निवेशकानां क्रयणप्रवृत्तेः कारणेन विपण्यां पुनः उत्साहः सञ्चारितः। फलतः व्यापारस्य अन्तिमे चरणे प्रमुखसूचकाङ्कयोः उल्लेखनीया वृद्धिः अभवत्। सूचना- प्रौद्योगिकीक्षेत्रस्य समभागेषु वर्धमानं क्रयणं, विदेशीनिवेशकानां समर्थनं विपण्याः वृद्धौ प्रमुखं योगदानम् अददात्। एताभ्यां कारणाभ्यां निवेशकानां विश्वासः सुदृढः अभवत्। दिवसस्य व्यवसायकाले १,५८२ अंशानां मूल्येषु वृद्धिः अभवत्, २,४५६ अंशानां मूल्येषु न्यूनता अभवत्, १७९ अंशानां मूल्येषु तु किमपि परिवर्तनं न अभवत्। समग्रतया शुक्रवासरे भारतीयांश- विपण्यां प्रमुखसूचकाङ्कयोः उल्लेखनीया वृद्धिः अभवत्।

भाजपादलेन उद्योगानां नाम्नि पञ्चसहस्रं बीघा- परिमिता भूमिः अतीव अल्पमूल्येन विक्रीता- मुख्यमन्त्री सुक्खूः

हिमसंस्कृतवार्ताः- धर्मशाला।

मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः भाजपादलस्य उपरि हिमाचलप्रदेशस्य अमूल्यां भूमिम् उद्योगपतिभ्यः अतीव अल्पमूल्येन विक्रेतुम् आरोपम् आरोपयन् अवदत् यत् पूर्वतन- भाजपासर्वकारस्य कार्यकाले उद्योगस्थापनस्य नाम्नि प्रदेशस्य सम्पदः यथेच्छं विभाजनं अभवत्। 'कस्टमाइज्ड-पैकेज' इत्यस्य नाम्नि प्रायः पञ्चसहस्रं बीघा-परिमिता भूमिः उद्योगेभ्यः प्रदत्ता, मुद्रांकशुल्कं क्षमां कृत्वा प्रदेशाय चतुःशतकोटि-रूप्यकेभ्यः पञ्चशतकोटि- रूप्यकपर्यन्तं हानिः प्राप्ता।

सः भाजपापक्षतः आरोपितानां भ्रष्टाचारस्य आरोपाणाम् उपरि मन्त्रिभ्यः अधिकारिभ्यश्च दोषमुक्तिं दत्तवान्। सः अवदत् यत् भाजपा-शासने 'हिमाचलः विक्रयार्थम्' आसीत्; अधुना सः एव भाजपापक्षः प्रदेशहितानां प्रार्तनं दत्त्वा सर्वकारं परितः रोद्धुं प्रयासं कुर्वन् अस्ति।

शुक्रवासरे विधानसभायां स्थगनप्रस्तावे चर्चायाः उत्तरं ददता मुख्यमन्त्रिणा पूर्वसर्वकारस्य निर्णयेषु प्रश्नाः उत्थापिताः, स्वसर्वकारस्य कार्याणां विवरणमपि स्थापितम्। प्रायः सार्धनवहोरां यावत् प्रचलितायाः चर्चायाः उत्तरदानस्य अन्तराले सदने तीव्रः कोलाहलः अभवत्। प्रतिपक्षः इच्छति स्म यत् भाजपा-दलस्य अवशिष्टाः विधायकाः वदेयुः, तदनन्तरं मुख्यमन्त्री उत्तरं दद्यात्। तथा सति प्रतिपक्षः सदने कोलाहलं कर्तुम् आरब्धवान्। मुख्यमन्त्रिणः उत्तरात्प्रभात् पूर्वमेव भाजपा-सदस्यैः स्वकीयासनेभ्यः उद्घोषणम् प्रारब्धम्। यदा मुख्यमन्त्री उत्तरं दातुम् आरब्धवान्, तदा भाजपा-विधायकाः उद्घोषणं कुर्वन्तः सदनस्य मध्यभागं प्राप्तवन्तः। प्रायः पञ्चपञ्चाशत् निमेषान् यावत् प्रतिपक्षसदस्याः उद्घोषणं कुर्वन्तः अतिष्ठन्, तदनन्तरं ते सदनात् बहिः गतवन्तः। मुख्यमन्त्री भाजपा-दलस्य उपरि असत्यस्य राजनीतिं कर्तुं दलबन्दी-प्रवृत्तिं च अनुसरितुम् आरोपम् आरोपितवान्। अनन्तरं कार्यस्थगनप्रस्तावः ध्वनिमतेन निरस्तः कृतः।

आवश्यकतायुक्तेभ्यः जनेभ्यः प्राप्स्यते गग्गल-विमानपत्तनं परितः भूमिः- गग्गल-विमानपत्तनं परितः भूमेः क्रयणे कृत्रिम- कृषिप्रमाणपत्राणाम् उपयोगस्य प्रकरणम् उत्थापयन्



मुख्यमन्त्री अवदत् यत् प्रायः द्विशतकनाल-परिमितायाः (२०० कनाल) भूमेः अनामी-व्यवहाराणाम् अन्वेषणाय विशेष- अन्वेषण-दलं निर्मितम् अस्ति।

ईदृशी भूमिः सर्वकारे निहिता कृत्वा आवश्यकतायुक्तेभ्यः प्रदेशवासिभ्यः आबण्टयिष्यते। सः अवदत् यत् तस्य सर्वकारेण कस्यापि जनस्य विरुद्धं राजनैतिकद्वेषेण अभियोगः न पञ्जीकृतः अस्ति। प्रतिपक्षस्य अनुपस्थितौ विधानसभाध्यक्षः भाजपा-विधायकानां पक्षतः आनीतं कार्यस्थगनप्रस्तावं निरस्तवान्।

'वाइल्ड-फ्लावर-हॉल' भवनात् प्रतिवर्षं प्राप्स्यन्ते चत्वारिंशत्कोटिरूप्यकाणि

मुख्यमन्त्री अवदत् यत् वर्तमानसर्वकारेण 'वाइल्ड- फ्लावर- हॉल' इत्यस्य विधिकः सङ्ग्रामः विजितः अस्ति। अनेन प्रदेशाय प्रतिवर्षं पञ्चत्रिंशत्कोटितः चत्वारिंशत्कोटिरूप्यकाणि (३५-४० कोटि) प्राप्स्यन्ते। 'बीबीएमबी' इत्यस्मिन् अंशदानस्य प्रतिफले आगामिषु विंशतिवर्षेषु प्रायः विंशतिसहस्रकोटिरूप्यकाणां प्राप्तेः आशा वर्तते। 'किशाऊ-परियोजनायाः' 'जेएसडब्ल्यू' संस्थायाश्च सम्बद्धप्रकरणेष्वपि सर्वकारेण प्रदेशस्य हितानां सङ्ग्रामः कृतः अस्ति।सः घोषणाम् अकरोत् यद् आगामिषु षण्मासेषु प्रदेशे एकसहस्रं (१,०००) विद्युत्-लोकयानानि क्रेष्यन्ते। साम्प्रतं क्रीतानां विद्युत्-लोकयानानां द्वादशवर्षाणां (१२ वर्षाणां) प्रतिभूतिः अस्ति, निर्माणसंस्थायै अधुनावधि भुक्तिः न कृता अस्ति। लोकयानेषु त्रुटिः प्राप्ते सति संस्थायाः भुक्तिः स्थगयिष्यते। हमीरपुर-लोकयानस्थानकस्य निर्माणे निविदायाः अतिरिक्तं द्वौ तलावपि सज्जीकृतौ इति वार्ता अपि कथिता।मुख्यमन्त्री स्पष्टीकृतवान् यत् 'पीटरहॉफ' भवनं न विक्रीतम् अस्ति, अपि तु तत्र शतप्रकोष्ठानां निर्माणं करिष्यते। दिल्लीस्थिते 'हिमाचल-निकेतने' सामान्य-प्रशासनविभागाय त्रिंशत् (३०) प्रकोष्ठाः उपलब्धाः भविष्यन्ति। स्वास्थ्यक्षेत्रे 'हिमकेयर' योजनायाः स्थाने नूतना स्वास्थ्यबीमा-नीतिः आनेतुं सज्जता वर्तते, यस्याः अन्तर्गततया दशलक्षरूप्यकाणि (१० लक्ष) यावत् निःशुल्क-उपचारस्य सुविधां दातुं योजना अस्ति। सः अवदत् यत् विपरीत-आर्थिकपरिस्थितीनां सत्स्वाऽपि सर्वकारः विकासकार्याणि निरन्तरं स्थापयति तथा प्रदेशस्य सम्पदायाः उपयोगः जनतायाः हिते क्रियते।

'धर्मशाला-मैराथन २.०' इत्यस्य प्रेरणागीतं विमोचितम्, अधुनावधि अष्टशतपञ्चाशत् (८५०) धावकाः कृतवन्तः पञ्जीकरणम्

हिमसंस्कृतवार्ता — धर्मशाला। मुख्यमन्त्री ठाकुर-सुखविन्दरसिंहसुक्खू-महोदयः शुक्रवासरे धर्मशालास्थिते अतिथिगृहे (सर्किट् हाउस्) 'धर्मशाला-मैराथन २.०' इत्यस्य आधिकारिकं प्रेरणागीतं विमोचितवान्। अस्मिन् अन्तराले सः धावनस्पर्धायाः (मैराथनस्य) गणवेशस्य पदकस्य च अनावरणम् अपि अकरोत्। 'काङ्गड़ा-वैली-कार्निवल्-२०२६' इत्यस्य अन्तर्गततया आयोजयिष्यमाणायाम् अस्यां मैराथन-स्पर्धायाम् अधुनावधि अष्टशतपञ्चाशत् अधिकेभ्यः धावकेभ्यः पञ्जीकरणं कारितम् अस्ति। आयोजकैः २० दिसम्बर्-दिनाङ्कं यावत् समग्रदेशात् द्विसहस्राधिकानां (२,०००) प्रतिभागिनां संयोजनस्य लक्ष्यं स्थापितम् अस्ति।

मैराथन-स्पर्धायां विविध-आयुवर्गाणां धावकानां कृते त्रि-पञ्च-दश-विंशति- द्विचत्वारिंशत्-किलोमीटर-परिमिताः पञ्च श्रेण्यः स्थापिताः सन्ति। अस्याः प्रथमे संस्करणे प्रायः त्रयोदशशतं (१,३००) धावकाः भागं गृहीतवन्तः आसन्। द्वितीयसंस्करणस्य माध्यमेन क्रीडायाः स्वास्थ्यवर्धक-गतिविधीनां (फिटनेस्) च प्रोत्साहनेन सहैव धर्मशालायाः पर्यटनगन्तव्यरूपेण नूतनं परिचयं दापयितुं प्रयासः क्रियते। मुख्यमन्त्री अवदत् यत् धर्मशाला-मैराथन-स्पर्धायाः उद्देश्यं युनः स्वस्थां सक्रियां च जीवनशैलीम् अङ्गीकर्तुं प्रेरयितुम् अस्ति। अस्याः माध्यमेन 'चिट्टा' मादकद्रव्यम् सदृश्याः सामाजिककुरीतेः विरुद्धमपि जागरूकता प्रसारयिष्यते। सः अकथयत् यत् प्रदेशसर्वकारः काङ्गड़ा-मण्डलं हिमाचलप्रदेशस्य पर्यटनराजधानीरूपेण विकसितुं कार्यं कुर्वन् अस्ति। मैराथन-सदृशानि आयोजनानि समग्रदेशस्य जनान् काङ्गड़ा-क्षेत्रं प्रति आकर्षयितुं सहायकानि सिद्धानि भविष्यन्ति।



भाजपा-दलेन षट्षष्टि-विधानसभाक्षेत्रेषु (६६) नियुक्ताः प्रभारिणः, राजीवबिन्दलेन प्रकाशिता सूची



हिमसंस्कृतवार्ता — शिमला।

भारतीयजनतादलस्य (भाजपा) हिमाचलप्रदेश-घटकेन सङ्गठनात्मकगतिविधिभ्यः कार्यक्रमेभ्यश्च गतिं दातुम् उद्देशेन प्रदेशस्य सर्वेषु विधानसभाक्षेत्रेषु प्रभारिणां नियुक्तिः कृता अस्ति। भाजपा-प्रदेशाध्यक्षः डॉ. राजीवबिन्दलः २० नवम्बर्, २०२६ दिनाङ्के विधानसभाक्षेत्रानुसारं प्रभारिणां सूचीं निर्गमितवान्।निर्गमितसूच्याः अनुसारेण प्रदेशस्य षट्षष्टि-विधानसभाक्षेत्रेषु (६६) दलस्य नेतृभ्यः पदाधिकारिभ्यश्च दायित्वं समर्पितम् अस्ति। नियुक्तेषु प्रभारीषु प्रदेशपदाधिकारिणः, मण्डलपदाधिकारिणः (जिलापदाधिकारिणः), प्रदेशकार्यकारिणीसदस्याः, पूर्वविधायकाः, पूर्वमण्डलाध्यक्षाः (पूर्वजिलाध्यक्षाः), विविधमोर्चाणां पदाधिकारिणः प्रकोष्ठानां संयोजकाश्च समाविष्टाः सन्ति।

मण्डलानुसारं नियुक्तानां प्रभारिणां विवरणम्:-

चम्बा-मण्डलेः चुराह-क्षेत्रात् दिनेशशर्मा, भरमौर-क्षेत्रात् चन्दूलालठाकुरः, चम्बा-क्षेत्रात् दिव्यचक्षुः, डलहौजी-क्षेत्रात् विनोदठाकुरः तथा भटियात-क्षेत्रात् सुभाष-उपाध्यायः दायित्वं प्राप्तवन्तः।

नूरपुर-सङ्गठनात्मकमण्डलेः नूरपुर-क्षेत्रात् जगदेवठाकुरः, इन्दौरा-क्षेत्रात् अभिजीतजम्वालः, फतेहपुर-क्षेत्रात् प्रदीपशर्मा तथा ज्वाली-क्षेत्रात् पङ्कजशर्मा 'हैप्पी' प्रभारी निर्मितः अस्ति।

देहरा-सङ्गठनात्मकमण्डलेः देहरा-क्षेत्रात् अभिषेकपाधा, जसवां-प्रागपुर-क्षेत्रात् सुशीलकालिया तथा ज्वालामुखी-क्षेत्रात् अचलपठानिया दायित्वं प्राप्तवन्तः।

पालमपुर-सङ्गठनात्मकमण्डलेः जयसिंहपुर-क्षेत्रात् अरविन्दशर्मा, सुलह-क्षेत्रात् अभिमन्युभट्टः, बैजनाथ-क्षेत्रात् नवीनकटोचः तथा पालमपुर-क्षेत्रात् सञ्जीवठाकुरः प्रभारी नियुक्तः अस्ति।

काङ्गड़ा-मण्डलेः काङ्गड़ा-क्षेत्रात् राकेशशर्मा, नगरोटा-क्षेत्रात् विशालनेहरिया, शाहपुर-क्षेत्रात् सञ्जयशर्मा तथा धर्मशाला-क्षेत्रात् देवेन्द्रकोहली दायित्वं समर्पितम् अस्ति।

कुल्लू-मण्डलेः कुल्लू-क्षेत्रात् अखिलेशकपूरः, मनाली-क्षेत्रात् राहुलसोलङ्की, बञ्जार-क्षेत्रात् जोगेन्द्रशुक्ला तथा आनी-क्षेत्रात् हेतरामठाकुरः प्रभारी निर्मितः अस्ति। सुन्दरनगर-सङ्गठनात्मकमण्डलेः करसोग-क्षेत्रात् सोहनसिंह-ठाकुरः, सुन्दरनगर-क्षेत्रात् राजेन्द्रभट्टः, नाचन-क्षेत्रात् चेतरामः, धर्मपुर-क्षेत्रात् प्रतापठाकुरः तथा सरकाघाट-क्षेत्रात् प्रतापसिंहः नियुक्ताः सन्ति।मण्डी-मण्डलेः सिराज-क्षेत्रात् मनीषकपूरः, द्रङ्ग-क्षेत्रात् कमलराणा, जोगिन्द्रनगर-क्षेत्रात् सञ्जयठाकुरः, मण्डी-क्षेत्रात् पालवर्मा तथा बल्ह-क्षेत्रात् रणवीरसिंहः दायित्वं प्राप्तवन्तः।

हमीरपुर-मण्डलेः भोरञ्ज-क्षेत्रात् सुशीलठाकुरः, हमीरपुर-क्षेत्रात् पवनशर्मा, सुजानपुर-क्षेत्रात् अनिलठाकुरः, नादौन-क्षेत्रात् अजयशर्मा तथा बड़सर-क्षेत्रात् हुकमसिंहबैंसः प्रभारी नियुक्ताः सन्ति।ऊना-मण्डलेः चिन्तपूर्णी-क्षेत्रात् सुशीलकालिया, गगरेट-क्षेत्रात् धर्मेन्द्रराणा, ऊना-क्षेत्रात् विश्वजीतपटियालः, कुटलैहड़-क्षेत्रात् शम्भु-गोस्वामी तथा हरोली-क्षेत्रात् मनोहरकुमारः दायित्वं प्राप्तवन्तः। बिलासपुर-मण्डलेः झण्डूता-क्षेत्रात् स्वतन्त्रसांख्यानः, घुमारवीं-क्षेत्रात् बालकृष्णठाकुरः, बिलासपुर-क्षेत्रात् नवीनशर्मा तथा श्रीनैनादेवीजी-क्षेत्रात् राकेशगौतमः प्रभारी नियुक्ताः सन्ति।सोलन-मण्डलेः अर्की-क्षेत्रात् रविन्द्रपरिहारः, नालागढ़-क्षेत्रात् नरेन्द्रठाकुरः, दून-क्षेत्रात् सुरेन्द्रठाकुरः, सोलन-क्षेत्रात् ओ.पी. गान्धी तथा कसौली-क्षेत्रात् सञ्जीवटिङ्का दायित्वं प्राप्तवन्तः।सिरमौर-मण्डलेः पच्छाद-क्षेत्रात् रणवीरसिंहः, नाहन-क्षेत्रात् सुरेन्द्रहिन्दुस्तानी, श्रीरेणुकाजी-क्षेत्रात् साकेशशर्मा, पांवटासाहिब-क्षेत्रात् रामेश्वरशर्मा तथा शिलाई-क्षेत्रात् पवनचौधरी प्रभारिणः निर्मिताः सन्ति।महासू-सङ्गठनात्मकमण्डलेः चौपाल-क्षेत्रात् बलदेवराण्टा, ठियोग-क्षेत्रात् राजेशभ्रांटा, जुब्बल-कोटखाई-क्षेत्रात् विजयगुप्ता, रोहड़ू-क्षेत्रात् हरिचन्दडोगरा तथा रामपुर-क्षेत्रात् उमेशशर्मा दायित्वं समर्पितम् अस्ति।शिमला-मण्डलेः कसुम्पटी-क्षेत्रात् सतप्रकाशमानकः, शिमला-क्षेत्रात् प्यारसिंहकँवरः तथा शिमलाग्रामीण-क्षेत्रात् नरेशचौहानः विधानसभाप्रभारिणः नियुक्ताः सन्ति।

भाजपा-प्रदेशाध्यक्षेण डॉ. राजीवबिन्दलेन निर्गमितायां सूच्यां सर्वाः नियुक्तयः सङ्गठनात्मकगतिविधीः सुदृढाः कर्तुं तथा विधानसभाक्षेत्रेषु दलस्य कार्यक्रमान् प्रभावशालिरूपेण अग्रे वर्धयितुम् उद्देशेन कृताः सन्ति।

पञ्च दिनानि, एकशताधिकं (१०१) दीपकाः एका च प्राचीना मान्यता... ज्वालामुखी-क्षेत्रे आरब्धं पञ्चभीष्मम्

अवगच्छन्तु धार्मिकीं मान्यताम्



हिमसंस्कृतवार्ता — ज्वालामुखी।

शक्तिपीठस्य ज्वालामुख्याः प्रसिद्धे मुरलीमनोहरमन्दिरे कार्तिकमासस्य देवोत्थान-एकादश्यां 'पञ्चभीष्मस्य' शुभारम्भः कृतः अस्ति। धार्मिकमान्यतायाः अनुसारेण मन्दिरे पञ्चदिनानि यावत् एकशताधिकं (१०१) दीपकाः अहर्निशं प्रज्वालयिष्यन्ते।स्थानिकनिवासिनः, श्रद्धालवः मन्दिरस्य पुजारिणश्च एतेषु दीपकेषु अहर्निशं तैलस्य दानं कुर्वन्ति। मन्दिरे वर्षेभ्यः दीपदानस्य परम्परा निर्वह्यते। मान्यता अस्ति यत् पञ्चभीष्मस्य दिनेषु मन्दिरे दर्शनेन पुत्रप्राप्तेः आशीर्वादः लभ्यते, यदा तु दीपदानेन पितृदोषः दूरीभवति तथा गृहे लक्ष्म्याः वासः भवति।

मुरलीमनोहरमन्दिरस्य पुजारी हरबंशशर्मा सूचितवान् यत् पञ्चभीष्म-महोत्सवस्य आचरणस्य पृष्ठतः द्वौ प्रमुखौ धार्मिकौ कारणौ स्तः। मान्यतायाः अनुसारेण अस्मिन्नेव दिने मातुः तुलस्याः विवाहः मुरलीमनोहरेण भगवता श्रीकृष्णेन सह अभवत्। अपरत्र महाभारतकाले यदा भीष्मपितामहः शरशय्यायां शयानः आसीत्, तदा सः पाण्डवेभ्यः पञ्चदिनानि यावत् ज्ञानम् अददात्। अस्याः एव घटनायाः स्मृतौ पञ्चभीष्मपर्व आचर्यते। मन्दिरे पञ्चदिनानि यावत् दीपदानस्य परम्परया सह श्रद्धालवः पूजनम् अर्चनं च कृत्वा परिवारस्य सुखसमृद्धेः पितृणां च शान्तेः कामनां कुर्वन्ति।

पञ्चभीष्मस्य धार्मिकं महत्त्वम्

हिन्दूधर्मे पञ्चभीष्मस्य अथवा भीष्मपञ्चक-व्रतस्य विशेषं महत्त्वं मन्यते। धार्मिकमान्यतानाम् अनुसारेण इदं व्रतं कार्तिकमासस्य शुक्लपक्षस्य एकादश्याम् आरभ्य पूर्णिमां यावत् प्रचलति। इदं केषुचित् स्थानेषु 'पञ्चभीखू' इति नाम्ना अपि ज्ञायते। कार्तिकस्नानं कुर्वतां श्रद्धालूनां कृते एतेषां पञ्चदिनानां विशेषं महत्त्वम् अस्ति। धार्मिकपरम्परानुसारं भीष्मपितामहः अपि एतेषु दिनेषु व्रतं साधनां च अकरोत्, यस्य कारणात् इदं 'भीष्मपञ्चकम्' कथ्यते।

पञ्चभीष्मस्य इतिहासः

महाभारतयुद्धस्य अनन्तरं यदा पाण्डवानां विजयः अभवत्, तदा भगवान् श्रीकृष्णः तान् भीष्मपितामहस्य समीपम् अनयत् तथा पाण्डवेभ्यः ज्ञानं दातुम् अनुरोधम् अकरोत्। शरशय्यायां शयानः सूर्यस्य च उत्तरायणगमनाय प्रतीक्षमाणः भीष्मपितामहः श्रीकृष्णाय पाण्डवेभ्यश्च राजधर्मस्य, वर्णधर्मस्य मोक्षधर्मस्य च ज्ञानम् अयच्छत्।भीष्मपितामहः एकादशीतः पूर्णिमां यावत् पञ्चसु दिनेषु ज्ञानं दत्तवान्। धार्मिकमान्यतायाः अनुसारेण श्रीकृष्णः एतानि पञ्च दिनानि मङ्गलकारीणि निर्दिश्य एतेभ्यः 'भीष्मपञ्चकम्' इति नाम्ना प्रसिद्धं भवितुम् आशीर्वादं दत्तवान्। पञ्चभीष्मस्य परम्परायाः सम्बन्धः मातुः तुलस्याः विवाहेन सह अपि योज्यते। मान्यतानुसारं देवोत्थान-एकादश्यां मातुः तुलस्याः विवाहः भगवता श्रीकृष्णेन सह सञ्जातः आसीत्। अस्मादेव कारणात् एतेषु दिनेषु मन्दिरेषु पूजायाः, दीपदानस्य धार्मिकानुष्ठानानां च विशेषं महत्त्वं तिष्ठति।

मुख्यमन्त्रिणा पैरा-अध्यापकानां समस्याः गम्भीरतया श्रुताः, विस्तृतचर्चायै देहरा-नगरे उपवेशनाय आमन्त्रिताः



हिमसंस्कृतवार्ता धर्मशाला। हिमाचल-प्रदेश-नियमित-पैरा-अध्यापक-सङ्घस्य एकः प्रतिनिधिमण्डलः सङ्घस्य राज्यप्रधानस्य आदरणीयस्य श्रीराममूर्तिशर्मणः अध्यक्षतायां धर्मशाला-विधानसभायां माननीय-मुख्यमन्त्रिणा श्रीसुखविन्दरसिंहसुक्खू-महोदयेन सह मिलितवान्। अस्मिन् अवसरे प्रतिनिधिमण्डलेन प्रदेशस्य नियमित-पैरा-अध्यापकैः सम्बद्धाः विविधाः समस्याः लम्बितयाचनाः च मुख्यमन्त्रि-महोदयस्य समक्षं प्रस्तुताः। मुख्यमन्त्रिमहोदयेन प्रतिनिधिमण्डलस्य वार्ताः गम्भीरतापूर्वकं ध्यानपूर्वकं च श्रुताः। तेन एतासु समस्यासु विस्तृतविचारविमर्शं कर्तुं प्रतिनिधिमण्डलम् 'देहरा'-नगरे उपवेशनाय आमन्त्रितम्। सङ्घस्य प्रतिनिधिभिः मुख्यमन्त्रिमहोदयेन तेषां समस्यानां श्रवणाय तथा विस्तृतचर्चायै समयप्रदानाय आभारः प्रकटितः। सङ्घस्य आशा वर्तते यत् आगामिनि उपवेशने पैरा-अध्यापकानां लम्बितसमस्यानां याचनानां च समाधानदिशि सार्थकः प्रयासः भविष्यति। अस्मिन् प्रतिनिधिमण्डले श्रीमती किरणशर्मा, श्रीमान् रिंकू-कटोचः, श्रीमान् राजेशः, श्रीमान् सुरेशलठः, श्रीमान् भूपेशशर्मा, श्रीमान् शशिभूषणः, श्रीमान् रजनीश-अवस्थी, श्रीमान् पुनीतः, श्रीमान् शान्तिः, श्रीमान् राजदीनः, श्रीमान् रनेशः, श्रीमान् राजेशः तथा श्रीमान् निर्मलः इत्यादयः अन्ये प्रतिनिधयः च उपस्थिताः आसन्।

संस्कृतस्य गौरवस्य प्रतिष्ठा- महात्मागान्धि-

चिकित्सामहाविद्यालये विशिष्टातिथिवक्तृत्वेन सम्मानितः संस्कृतसेवी



हिमसंस्कृतवार्ताः वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेशस्य राजधानी लखनऊस्थे महात्मागान्धि-चिकित्सामहाविद्यालये आयोजिते विशिष्टकार्यक्रमे संस्कृतसेवकः विशिष्टातिथिवक्तृत्वेन सादरं सम्मानितः। अस्मिन् अवसरे तस्य विशिष्टवक्तृत्वेन उपस्थितानां जनानां मनांसि संस्कृतभाषायाः गौरवगाथया, भारतीयसंस्कृतेः दिव्यपरम्परया च समाकृष्टानि। सम्मानप्राप्त्यनन्तरं स्वकीयभावान् प्रकटयन् सः अवदत्- "अयं सम्मानः न केवलं मम व्यक्तिगतः सम्मानः, अपि तु साक्षात् देववाणीसंस्कृतभाषायाः सम्मानः अस्ति। संस्कृतं न केवलं भाषा, अपि तु अस्माकं राष्ट्रस्य सांस्कृतिकचेतनायाः, ज्ञानपरम्परायाः, आध्यात्मिकवैभवस्य च अमूल्यनिधिः अस्ति।" सः अग्रे अवदत् यत् संस्कृतभाषा भारतीयज्ञानविज्ञानस्य सनातनी आधारशिला अस्ति। अस्याः भाषायाः संरक्षणं, संवर्धनं, प्रचारप्रसारश्च अस्माकं सर्वेषां परमं कर्तव्यम्। अस्मिन् सम्मानावसरे तेन विनयपूर्वकं समर्पितः भावः सर्वेषां कृते प्रेरणास्रोतः अभवत्। वस्तुतः यत्र संस्कृतस्य सम्मानः भवति, तत्र भारतीयसंस्कृतेः गौरवं वर्धते, यत्र देववाण्याः निनादः श्रूयते, तत्र ज्ञानस्य संस्कारस्य च नवप्रभातः जायते। संस्कृतस्य जयः। भारतीयसंस्कृतेः विजयः।

धानक्रयकेन्द्रस्य निरीक्षणं कृतवान् जिलाधिकारी, अनियमिततायां

कठोरकार्यविधेः चेतावनी

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। जिलाधिकारी गौरवसिंहसोगरवालः जोगिया-द्वितीयस्थस्य राजकीयधानक्रयकेन्द्रस्य निरीक्षणम् अकरोत्। निरीक्षणसमये तेन केन्द्रे प्रचलितायाः धानक्रयप्रक्रियायाः विषये विस्तृतं ज्ञानं प्राप्तुम् जिलाखाद्यविपणनाधिकारिणं पृष्टम्। जिलाखाद्यविपणनाधिकारी रमेशकुमारश्रीवास्तवः जिलाधिकारिणं सूचितवान् यत् क्रयकेन्द्रे धानक्रयः नियमितरूपेण प्रचलति। अस्मिन् अवसरे जिलाधिकारी जनपदस्य सर्वेषु धानक्रयकेन्द्रेषु धानस्य क्रयणं सुनिश्चितं कर्तुं निर्देशम् अददात्। तेन सर्वेभ्यः केन्द्रप्रभारिभ्यः प्रतिदिनं निर्धारितलक्ष्यस्य अनुरूपं धानक्रयणं कर्तुं स्पष्टनिर्देशः प्रदत्तः। अस्मिन् कार्ये कस्यापि प्रकारस्य प्रमादः अथवा शिथिलता न सह्यते। यदि कश्चित् अधिकारी अथवा कर्मचारी कर्तव्यपालने प्रमादं करोति, तर्हि तस्य विरुद्धं कठोरकार्यवाही विधास्यते इति जिलाधिकारी चेतावनीम् अददात्। तेन कृषकेभ्यः समये एव धानविक्रयस्य धनराशिं प्रदातुं, क्रयप्रक्रियायां कृषकाणां कस्यापि प्रकारस्य असुविधा न भवेत् इति विशेषनिर्देशः प्रदत्तः। क्रयकेन्द्रप्रभारिणः विरुद्धं आक्षेपः प्राप्तः चेत् सम्बन्धितस्य विरुद्धं कठोरकार्यवाही निश्चिता भविष्यति इति सः स्पष्टमुक्तवान्। अस्मिन् निरीक्षणावसरे जिलाखाद्यविपणनाधिकारी रमेशकुमारश्रीवास्तवः अन्ये च सम्बन्धिताः अधिकारी- कर्मचारिणः उपस्थिताः आसन्।

बोधगयायां दशदेशीयानां बौद्धश्रद्धालूनां समुपस्थितौ

कठिन-चीवरदान-महोत्सवः सम्पन्नः



हिमसंस्कृतवार्ताः- डॉ विमलेश झा, बोधगया

बिहारराज्यस्य अन्ताराष्ट्रियपर्यटनस्थले बोधगयायां स्थिते वट- थाईमगधविपश्यना-केन्द्रे आयोजितस्य चतुर्दिवसीयस्य अन्ताराष्ट्रिय-योगसत्रस्य समापनं शुक्रवासरे अभवत्। अस्मिन्नवसरे कठिनचीवरदानमहोत्सवः अपि समायोजितः, यस्मिन् विश्वस्य प्रायः दशदेशेभ्यः आगताः बौद्धश्रद्धालवः पर्यटकाः च उत्साहपूर्वकं भागं गृहीतवन्तः। थाईलैण्ड, मलेशिया, नेपाल, म्यान्मार, जापान इत्यादिभ्यः विभिन्नदेशेभ्यः आगतानां श्रद्धालूनां सान्निध्ये धार्मिकाः आध्यात्मिकाः च कार्यक्रमाः सम्पन्नाः अभवन्। कार्यक्रमस्य आयोजनं वटथाईमगध विपश्यनाकेन्द्रस्य प्रमुखस्य भन्तेप्रज्ञाबिते बोधिकुनमहोदयस्य तथा तस्य शिष्याणां सान्निध्ये मार्गदर्शने च अभवत्। अस्मिन्नवसरे भन्ते प्रज्ञाबिते बोधिकुनमहोदयेन कथितं यत् कार्यक्रमस्य अन्तर्गतं प्रातःकाले योगाभ्याससत्रम् आयोजितम्। ततः जनानां मध्ये निःशुल्कानि आयुर्वेदिकौषधानि वितरितानि। योगेन, आयुर्वेदेन, आध्यात्मिक-साधनया च स्वस्थसमाजस्य निर्माणस्य सन्देशः प्रदत्तः। अस्मिन् कार्यक्रमे पञ्चयुवानः सांसारिकजीवनं परित्यज्य बौद्धधर्मस्य दीक्षां स्वीकृतवन्तः। ते भगवतः बुद्धस्य सिद्धान्तानां, आध्यात्मिकसाधनायाः तथा मानवसेवायाः कृते स्वजीवनं समर्पयितुं सङ्कल्पं कृतवन्तः। अस्मिन् कठिनचीवरदानमहोत्सवे बौद्धभिक्षुभ्यः चीवराणि खाद्यसामग्री च श्रद्धापूर्वकं समर्पितानि। योगगुरुः स्वामी सन्तोषानन्दः अवदत् यत् एतादृशाः धार्मिकाः आध्यात्मिकाश्च कार्यक्रमाः मानवसेवायाः, त्यागस्य, करुणायाः च भावनां सुदृढां कुर्वन्ति। शिक्षायाः प्रोत्साहनार्थं बोधिकुनविद्यालयस्य प्रायः त्रिंशताधिकपञ्चाशत् विद्यार्थिनां समुपस्थितौ पञ्चाशत् आवश्यकताग्रस्तबालकेभ्यः द्विचक्रिकाः वितरिताः। अस्मिन्नवसरे बालकैः सामूहिकरूपेण बौद्धमन्त्राणाम् उच्चारणम् अपि कृतम्।

स्वामी सन्तोषानन्दः अवदत् यत् भगवतःबुद्धस्य सन्देशः न केवलम् एकस्य धर्मस्य वा देशस्य कृते सीमितः, अपितु सम्पूर्णमानवजात्याः कल्याणस्य मार्गं प्रदर्शयति। सनातनधर्मः बौद्धदर्शनं च उभे प्रेम्णः, करुणायाः, अहिंसायाः, त्यागस्य तथा विश्वशान्तेः शिक्षां प्रदत्तः। अद्य सम्पूर्णविश्वस्य आवश्यकता अस्ति यत् जनाः परस्परमतभेदान् विस्मृत्य एकतया कार्यं कुर्युः। सः अग्रे अवदत् यत् यदा सनातनबौद्धपरम्परयोः अनुयायिनः एकस्मिन् मञ्चे समागत्य सहकार्यं करिष्यन्ति, तदैव भारतदेशात् सम्पूर्णविश्वं प्रति शान्तेः, सद्भावस्य, भ्रातृत्वस्य च सशक्तः सन्देशः प्रसारयितुं शक्यते।

कालिदासजयन्त्यवसरे 'मालविकाग्निमित्रम्'

इत्यस्य मञ्चनैः संस्कृतरङ्गमञ्चस्य मनोहरा सन्ध्या



हिमसंस्कृतवार्ताः- लखनऊ। महाकवि-कालिदास- जयन्त्यवसरे गुरुवासरे राजधानीनगरे संस्कृतरङ्गमञ्चस्य भव्यप्रस्तुत्या दर्शकाः शास्त्रीय-नाट्यपरम्परया साक्षात् परिचिताः अभवन्। उत्तरप्रदेश- संस्कृतसंस्थानस्य, सामाजिक-सांस्कृतिक- संस्थायाः 'सार्थक- एक सामाजिक विचार' इत्यनयोः संयुक्ततत्त्वावधानेन न्यू हैदराबादस्थिते उत्तरप्रदेश- संस्कृत- संस्थानस्य प्रेक्षागृहे महाकविकालिदासविरचितस्य संस्कृतनाटकस्य 'मालविकाग्निमित्रम्' इत्यस्य मञ्चनं कृतम्।

कार्यक्रमः उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशकस्य प्रेमेन्द्रकुमारगुप्तस्य सान्निध्ये आयोजितः। दीपप्रज्वलनस्य अतिथिस्वागतस्य च अनन्तरं नाटकस्य प्रस्तुतिः अभवत्। भारतेन्दुनाट्य-अकादम्या प्रशिक्षितस्य निर्देशकस्य रमणकुमारस्य निर्देशने, अंशुगुप्तस्य संस्कृतानुवादेन च प्रस्तुतं नाटकं दर्शकान् शुङ्गकालीनराजदरबारस्य, प्रेम्णः, राजनीतेः मानवीयभावनानां च कथानकेन सह संयोजितवान्।

पञ्चाङ्कात्मके नाटके विदिशायाः राज्ञः अग्निमित्रस्य विदर्भराजकुमार्याः मालविकायाश्च प्रणयकथा केन्द्रे स्थापिता। मालविकायाः सामान्यदासी इति मन्यमानत्वात् आरभ्य तस्याः राजकुमार्याः स्वरूपस्य रहस्योद्घाटनपर्यन्तम्, अन्ते च अग्निमित्रेण सह तस्याः विवाहपर्यन्तं कथा कलाकारैः प्रभावशालिरूपेण मञ्चे प्रस्तुताः। विदूषकस्य चातुर्यम्, अशोकदोहदस्य प्रसङ्गः तथा मालविकायाः परिचयस्य उद्घाटनस्य घटनाः दर्शकानां विशेषप्रशंसां प्राप्तवन्तः।

राज्ञः अग्निमित्रस्य भूमिकायां दीपकजोशी, मालविकायाः भूमिकायां राशिचौंदिया इत्यनयोः अभिनयः दर्शकैः अत्यन्तं प्रशंसितः। सूत्रधार-१ राहुलसेनः, सूत्रधार-२ सन्देशकुमारः, विदूषकस्य भूमिकायाम् आलोककुमारशुक्लः 'तुमुलः', महाराण्याः धारिण्याः भूमिकायां प्रियङ्का, बकुलावलिकायाः भूमिकायां पौरवीहरिचाह, जयसेनस्य भूमिकायां प्रियांशुः, इरावत्याः भूमिकायाम् अदितिः, निपुणिकायाः भूमिकायां पारसवर्मा इत्येतेषां सहितम् अन्येषाम् कलाकाराणाम् अपि प्रभावशाली अभिनयः अभवत्।

सहायकनिर्देशनं आलोककुमारशुक्लः 'तुमुलः' तथा राहुलसेनः कृतवन्तौ। मैलोरङ्ग, देहली, इत्यस्य डॉ. प्रकाशझा इत्यस्य विशेषसहयोगः प्राप्तः। सत्यप्रकाशमिश्रस्य मञ्चसञ्चालनम्, सपनस्य शिवांशोश्च सङ्गीतपरिकल्पना, प्रियांक कठेरिया इत्यस्य प्रकाशपरिकल्पना, प्रियङ्कायाः वस्त्रविन्यासः, विशुपाण्डेयस्य प्राञ्जलिकायाश्च रूपसज्जा प्रस्तुतिं मनोहारिणीं कृतवन्तः। मञ्चपरिकल्पना अनिमेषः, पङ्कजः, भारतः कृतवन्तः।

निःशुल्करूपेण आयोजितायां नाट्यसन्ध्यायां बहुसङ्ख्याकाः कलासाहित्यप्रेमिणः उपस्थिताः आसन्। प्रस्तुत्यनन्तरं निर्देशकः कलाकाराश्च सम्मानिताः। 'सार्थक- एक सामाजिक विचार' इति संस्था इतः पूर्वं महाकवेः भासस्य 'अभिषेकनाटकम्' इत्यस्य संस्कृते हिन्दीभाषायां च मञ्चनं कृतवती अस्ति

स्वर्णाक्षरैः लिखिता श्रीमद्भगवद्गीतायाः दुर्लभा पाण्डुलिपिः भारतस्य ज्ञानपरम्परायाः गौरवं वर्धयति



हिमसंस्कृतवार्ताः- नवदेहली। भारतस्य समृद्धायाः प्राचीनज्ञानपरम्परायाः आध्यात्मिक-वैभवस्य च परिचायिका षोडशशताब्द्याः स्वर्णाक्षरैः लिखिता श्रीमद्भगवद्गीतायाः दुर्लभा पाण्डुलिपिः नवदेहल्याः भारतमण्डपम् इत्यत्र आयोजिते पञ्चत्वारिंशत्तमे भारत- अन्तर्राष्ट्रीय-वाणिज्यमेले छत्तीसगढ- राज्यस्य समृद्धां सांस्कृतिकाम् आध्यात्मिकीं च विरासतं गौरवपूर्वकं प्रदर्शयति। रामायणस्य पाण्डुलिपिभिः, प्राचीनताम्रपत्रैः, तालपत्रैः, हस्तलिखितग्रन्थैः च सह प्रदर्शिता इयं पाण्डुलिपिः भारतस्य गौरवशालिनीं प्राचीनां ज्ञानपरम्परां चित्ताकर्षकरूपेण परिचाययति।

भारतीयाः पाण्डुलिपयः केवलम् अतीतकालस्य धरोहराः न सन्ति, अपि तु भारतस्य सभ्यतागत-चेतनायाः, सांस्कृतिकवैभवस्य, शाश्वतज्ञानस्य च अमूल्याः स्रोतांसि सन्ति। एताः अस्माकं समृद्धस्य ज्ञानविज्ञानस्य आध्यात्मिकचिन्तनस्य च अमरपरम्परायाः सजीवं प्रमाणम् अपि सन्ति।

पूज्यबागेश्वरधामसरकारस्य

कथाश्रवणेन आध्यात्मिकलाभः प्राप्तः



हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेयः, बेन्ती, कुण्डा (प्रतापगढजनपदम्)। उत्तरप्रदेशस्य प्रतापगढजनपदस्य कुण्डाक्षेत्रान्तर्गतस्य बेन्तीस्थले पूज्यबागेश्वरधामसरकारस्य पावनमुखा-रविन्देन प्रवर्तमानायां श्रीकथायां बाँसी-विधानसभाक्षेत्रस्य विधायकः जयप्रतापसिंहवर्यः सपरिवारं सम्मिलितः भूत्वा आध्यात्मिकलाभं प्राप्तवान्। अवसरेऽस्मिन् पूज्यसरकारस्य सान्निध्यं, श्रीकथायाः श्रवणं च तस्य मनः श्रद्धया, भक्त्या, सकारात्मकया ऊर्जया च परिपूरितम् अकरोत्। कथाश्रवणेन आध्यात्मिकशान्तेः अनुभूतिः जाता इति सः अवदत्।



विद्यार्थिभिः विद्या भारतीसंस्थायाः अखिलभारतीयमहामन्त्रिणः

श्रीदेशराजशर्मणः विशेषसाक्षात्कारः सम्पन्नः।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, मेरठम्। अस्माकं विद्यालयस्य विद्यार्थिनां कृते गौरवस्य प्रेरणायाश्च अविस्मरणीयः अवसरः समुपस्थितः। विद्या भारती अखिलभारतीयशिक्षासंस्थानस्य अखिलभारतीय- महामन्त्री आदरणीयः देशराजशर्माहोदयः विद्यालयस्य विद्यार्थिभिः विशेषसाक्षात्कारस्य माध्यमेन साक्षात्कृतः। अस्मिन् साक्षात्कारकार्यक्रमे विद्यार्थिभिः शिक्षायाः, संस्काराणाम्, भारतीयसंस्कृतेः, राष्ट्रनिर्माणस्य, विद्या भारतीसंस्थायाः शैक्षिकादर्शानां च विषये विविधाः महत्त्वपूर्णाः प्रश्नाः पृष्टाः। श्रीशर्ममहोदयेन अपि स्वानुभवैः प्रेरणादायकैः विचारैश्च विद्यार्थिनः सम्यक् मार्गदर्शिताः। अयं संवादानुभवः विद्यार्थिनाम् आत्मविश्वासवर्धनाय, सम्भाषण-कौशल- विकासाय, जिज्ञासावृद्धये, व्यक्तित्व-परिष्काराय च अत्यन्तम् उपयोगी प्रेरणाप्रदश्च अभवत्। शिक्षाक्षेत्रस्य वरिष्ठस्य अनुभवीमार्गदर्शकस्य सान्निध्ये प्रत्यक्षं संवादं कर्तुम् अवसरः प्राप्तः इति विद्यार्थिनां कृते विशेषं सौभाग्यम् आसीत्। एतादृशाः अनुभवाः विद्यार्थिनः केवलं पुस्तकीयज्ञानपर्यन्तं सीमिताः न स्थापयन्ति, अपि तु जीवनस्य वास्तविकमूल्यैः, आदर्शैः, संस्कारैश्च सह तान् सम्बध्नन्ति। निःसन्देहं कार्यक्रमोऽयं विद्यार्थिनां सर्वाङ्गीणविकासाय प्रेरणादायकः सिद्धः।

गङ्गायाः सांस्कृतिकविरासतायाः संरक्षणाय अनुसन्धानाय च संस्थागताधारः



हिमसंस्कृतवार्ताः- वाराणसी, २० नवम्बर। सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयस्य, वाराणस्याः, भारतीय- ज्ञान- परम्परा- केन्द्रस्य, गङ्गासेवासमितेः, बलुआ (चन्दौली), मध्ये गङ्गायाः सांस्कृतिक- आध्यात्मिक- ऐतिहासिक- विरासतायाः संरक्षणाय, अनुसन्धानाय प्रपत्रीकरणाय च सहमतिज्ञापनं हस्ताक्षरितम्। अस्य उद्देश्यं गङ्गायाः सन्तपरम्परायाः, तीर्थपरम्परायाः, धार्मिकभूगोलस्य, ग्रामीण- गङ्गातटानां सांस्कृतिकविरासतायाः अनुसन्धानमाध्यमेन संरक्षणं कृत्वा तस्याः व्यापकपरिचयं प्रदातुम् अस्ति।

कुलपतिः प्रो. बिहारीलालशर्मा अवदत् यत् गङ्गा केवलं जलधारा नास्ति, अपि तु भारतीयसभ्यतायाः जीवनरेखा अस्ति। वेदेषु, पुराणेषु, सन्तपरम्परायां लोकसंस्कृतौ च गङ्गायाः व्यापकं स्वरूपं दृश्यते। तेन उक्तं यत् गङ्गासेवासमित्या विगतेषु १७ वर्षेषु धरातले क्रियमाणस्य संरक्षणस्य जनजागरणकार्यस्य च अधुना विश्वविद्यालयस्य शैक्षणिकसहयोगेन अनुसन्धानस्य प्रपत्रीकरणस्य च आधारः प्राप्स्यते।अस्य अन्तर्गतं अनुसन्धानपरियोजनानां,

राष्ट्रियान्तर्राष्ट्रीयसङ्गोष्ठीनां, क्षेत्रीयसर्वेक्षणस्य, प्राचीनमन्दिराणां तीर्थस्थलानां च प्रपत्रीकरणस्य, अनुसन्धानप्रकाशनस्य, अङ्कीय-अभिलेखागारस्य च कार्याणि क्रियन्ते। छात्रेभ्यः शोधार्थिभ्यश्च क्षेत्रीयाध्ययनस्य प्रशिक्षणस्य च व्यवस्था अपि भविष्यति। बलुआस्थितस्य गङ्गातटस्य विशिष्टताम् उल्लिख्य उक्तं यत् अत्र गङ्गा पश्चिमवाहिनी अस्ति, या शास्त्रीयपरम्परायां विशेषतया पवित्रा मन्यते। गङ्गासेवासमितिः विगतेषु १७ वर्षेषु अस्मिन् क्षेत्रे धार्मिक- सांस्कृतिक- सामाजिक- गतिविधीनां माध्यमेन गङ्गासंरक्षणस्य जनजागरणस्य च कार्यं करोति। कार्यक्रमे भारतीयज्ञानपरम्पराकेन्द्रस्य समन्वयकः प्रो. दिनेशगर्गः, केन्द्रप्रभारी डॉ. ज्ञानेन्द्रशापकोटः, वेदविभागस्य आचार्यः विजयशर्मा, गङ्गासेवासमितेः अध्यक्षः दीपक जायसवालः, कार्यक्रमस्य सञ्चालकः अरविन्द पाण्डेयः, प्राञ्जल पाण्डेयः, अच्युतकृष्ण त्रिपाठी इत्येतेषां सहितम् आचार्याः, कार्यकर्तारः अन्ये च गणमान्यजनाः उपस्थिताः आसन्। अस्यैव क्रमस्य अन्तर्गतं २०२६ तमस्य वर्षस्य नवम्बर-मासस्य २३- २४ दिनाङ्कयोः बलुआनगरे 'भारतीयसभ्यतायां गङ्गा- पश्चिमवाहिन्याः गङ्गायाः सन्तपरम्परा, धार्मिकभूगोलः, सांस्कृतिकविरासत् तथा ग्रामीणतटानां संरक्षणम्' इति विषये राष्ट्रियसङ्गोष्ठी, देवदीपावली-गङ्गामहोत्सवः आयोजितः भविष्यति। अस्मिन् देशस्य विभिन्नेभ्यः भागेभ्यः विद्वांसः, सन्ताः, शोधकर्तारः गङ्गाभक्ताश्च सहभागी भविष्यन्ति।

नियमावलीप्रख्यापना अनन्तरमेव भविता

गृहौणी- अभिलेखेषु संशोधनम्

राजस्वपरिषदा सूचना-आयोगाय प्रदत्ता सूचना; सूचना-आयुक्तस्य मोहम्मद नदीमस्य आदेशः।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेशे ग्रामीणक्षेत्रेषु निर्मितेषु गृहौणी- अभिलेखेषु संशोधनस्य प्रक्रिया सम्प्रति विधिवत् प्रारब्धुं न शक्यते। एतस्य प्रमुखं कारणं राजस्वपरिषदा सूचना-आयोगाय प्रेषितायां सूचनायां स्पष्टतया प्रतिपादितम् अस्ति यत् सम्बन्धितायाः नियमावल्याः प्रख्यापनानन्तरमेव पूर्वनिर्मितेषु गृहौणी-अभिलेखेषु संशोधनं कर्तुं शक्यते। राजस्वपरिषदा प्रदत्तसूचनानुसारं गृहौणी-निर्माणकार्यं उत्तरप्रदेशीय- आबादी- सर्वेक्षण- अभिलेख- सञ्चालन- विनियमावली, २०२० इत्यस्य अन्तर्गतं सम्पादितम् अस्ति तथा अद्यापि सम्पाद्यमानम् अस्ति। अस्यां विनियमावल्यां गृहौणी-निर्माणपर्यन्तं सम्पूर्णा प्रक्रिया निर्दिष्टा अस्ति, किन्तु गृहौणी-निर्माणानन्तरं तस्याः संशोधनस्य कश्चन विधिकः प्रावधानः नास्ति। अतः निर्मितगृहौणीषु संशोधनार्थं विधिक- व्यवस्थायाः अभावं दृष्ट्वा उत्तरप्रदेश- ग्रामीण- आबादी- अभिलेख- अधिनियमः, २०२५ प्रख्यापितः। अस्य अधिनियमस्य प्रावधानानां कार्यान्वयनार्थं नियमावलीप्रख्यापनस्य प्रक्रिया सम्प्रति प्रचलति। राजस्वपरिषदा स्पष्टं कृतं यत् उक्तनियमावल्याः प्रख्यापनानन्तरं पूर्वनिर्मितेषु गृहौणी-अभिलेखेषु संशोधनस्य विधिकप्रक्रिया सुनिश्चितं भविष्यति। ततः परमेव नियमानुसारं संशोधनकार्यं कर्तुं शक्यते।

सूचना-आयुक्तस्य आदेशः

अस्मिन् प्रकरणे सूचना-आयुक्तेन मोहम्मद नदीमेन आदेशः प्रदत्तः यत् राजस्वपरिषदा प्रदत्ता सूचना पर्याप्ता अस्ति। सूचनाधिकार-अधिनियमस्य अन्तर्गतं केवलं विभागेन धारितानां सूचनानामेव प्रदायस्य प्रावधानम् अस्ति। गृहौणी-अभिलेखेषु संशोधनं किमर्थं न भवति इति यत् कारणं प्रार्थिना अपेक्षितम् आसीत्, तत् कारणम् अधुना तस्मै प्राप्तम् अस्ति।

उत्तरप्रदेशपुलिसेन त्रिभिः प्रतिष्ठितसंस्थाभिः सह त्रयः महत्त्वपूर्णाः सहकारसहमतिः कृताः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेशस्य आरक्षिविभागस्य आधुनिकीकरणाय, प्रौद्योगिक्याः विकासाय, साइबरसुरक्षाव्यवस्थायाः सुदृढीकरणाय च उत्तरप्रदेशपुलिसेन भारतीय- प्रौद्योगिकी-संस्थानम्, कानपुरम् इत्यादिभिः त्रिभिः प्रतिष्ठितसंस्थाभिः सह त्रयः महत्त्वपूर्णाः सहकारसहमतिः सम्पादिताः। आरक्षिमहानिदेशकस्य राजीवकृष्णस्य मार्गदर्शने इयं सहमतिः सम्पन्नाः। भारतीय- प्रौद्योगिकी-संस्थानेन, कानपुरेण सह कृतायां सहमत्यां साइबरसुरक्षा, कृत्रिमबुद्धिमत्ता, साइबर-अपराधान्वेषणविज्ञानम्, आधुनिक- आरक्षण-व्यवस्थासम्बद्धानां समाधानानां विकासे विशेषं कार्यं भविष्यति।

तथैव डिजिटल इण्डिया कॉर्पोरेशन् इति संस्थया सह कृतसहमत्याम् आरक्षिसेवाणाम् आधुनिकीकरणम्, अङ्कीयसेवानां विस्तारः, सूचनाप्रौद्योगिक्याः आधारभूतसंरचनायाः सुदृढीकरणं प्रमुखलक्ष्याणि सन्ति। प्रोटीन ई-गव टेक्नोलॉजीज इति संस्थया सह कृते तृतीयसहमत्यां सुरक्षितदत्तांशप्रबन्धनम्, अङ्कीयप्रणालीनाम् एकीकरणं, दत्तांशस्य सुरक्षितः विनिमयः इत्येतेषु विषयेषु सहयोगः भविष्यति। अस्मिन् अवसरे उत्तरप्रदेशपुलिसपक्षतः अपरपुलिसमहानिदेशकः (प्राविधिकसेवाः) भगवानस्वरूपः सहकारसहमति-पत्रेषु हस्ताक्षराणि अकरोत्।



नेपालदेशात् विवाहानन्तरं सिद्धार्थनगरम् आगताभ्यः विंशतिसहस्राधिकाभ्यः महिलाभ्यः तोषः मतदाता-सूच्यां नामसम्मिलनस्य मार्गः सुलभः अभवत्



हिमसंस्कृतवार्ताः वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। नेपालदेशात् विवाहं कृत्वा भारतम् आगताभ्यः सहस्रशः महिलाभ्यः महत्त्वपूर्णा सन्तोषवार्ता प्राप्ता अस्ति। विशेष- गहन-पुनरीक्षणस्य (एस.आई.आर.) अनन्तरं मतदाता-सूच्याः बहिर्गताः विंशतिसहस्राधिकाः महिलाः अधुना पुनः मतदाता-सूच्यां स्वनाम सम्मेलयितुम् अवसरं प्राप्स्यन्ति। वस्तुतः निर्वाचनायोगेन आधारपत्रस्य मान्यप्रलेखेषु समावेशः कृतः इति कारणेन एतासां महिलानां कृते मतदाता-सूच्यां नामसम्मिलनस्य प्रक्रिया सुगमा भविष्यति।

नेपालसीमया संलग्नेषु सिद्धार्थनगरजनपदस्य बढनी, शोहरतगढ़, बर्डपुर, लोटन, कपिलवस्तुक्षेत्रेषु स्थितेषु सीमावर्तिग्रामेषु नेपालीमूलाः बह्व्यः महिलाः विवाहानन्तरं दीर्घकालात् निवसन्ति। तासु अनेकाः पूर्वं विधानसभानिर्वाचनेषु लोकसभानिर्वाचनेषु च मतदानम् अपि कृतवत्यः आसन्। किन्तु विशेष-गहन- पुनरीक्षणकाले वर्षद्वयसहस्रत्रयस्य (२००३) मतदातासूच्यां मातापित्रोः विवरणस्य अनुपलब्धतया, जन्मनिवाससम्बद्धानाम् अपेक्षितानां प्रमाणपत्राणाम् अभावात् तासां नामानि मतदाता-सूचीतः अपसारितानि आसन्। कपिलवस्तुविधानसभाक्षेत्रस्य अहिरौलीग्रामे एव अष्टाधिकाः महिलाः अस्याः समस्यायाः प्रभाविता अभवन्। ग्रामस्य पूनम, कुसुम, अनीता, किरण इत्येताः च अवदन् यत् ताः दीर्घकालात् भारतदेशे निवसन्ति, पूर्वम् अनेकनिर्वाचनेषु मतदानम् अपि कृतवत्यः, किन्तु विशेषगहनपुनरीक्षणकाले तासां नामानि मतदाता-सूचीतः निष्कासितानि।

अधुना विशेषसंक्षिप्तपुनरीक्षणाभियानस्य अन्तर्गतं योग्याः महिलाः प्रपत्रं षट् (फार्म-६) पूरयित्वा मतदाता-सूच्यां स्वनाम सम्मिलयितुं आवेदनं कर्तुं शक्नुवन्ति। आवेदनपत्रेण सह निर्धारितानि जन्मतिथिसम्बद्धानि निवाससम्बद्धानि च प्रमाणपत्राणि समर्पणीयानि भविष्यन्ति। अत्र महत्त्वपूर्णः विषयः अस्ति यत् केवलम् आधारपत्रं, विवाहः अथवा भारतदेशे दीर्घकालीनं निवासः भारतीय- नागरिकतायाः प्रमाणं न भवति। मतदातृत्वं प्राप्तुं भारतीयनागरिकता तथा निर्वाचनविधिना निर्धारिताः अन्याः सर्वाः अर्हताः अनिवार्यतया पूरणीयाः सन्ति। अस्मिन् विषये अपरजिलाधिकारी सन्दीपकुमारश्रीवास्तवः अवदत् यत् आधारपत्रं मान्यप्रलेखेषु समाविष्टम् अस्ति। अर्हतां धारयन्तः नागरिकाः निर्धारितानि अभिलेखानि संलग्नीकृत्य प्रपत्रं षट् पूरयित्वा मतदातासूच्यां स्वनाम सम्मिलयितुं आवेदनं कर्तुं शक्नुवन्ति।

अधुना द्रष्टव्यं भविष्यति यत् अस्य पुनरीक्षणाभियानस्य माध्यमेन नेपालदेशात् विवाहानन्तरम् आगतासु कति अर्हाः महिलाः पुनः मतदाता-सूच्यां स्थानं प्राप्तुं सफलाः भवन्ति।

ओडिशाराज्ये टिटलागढस्थं रहस्यमयं

शिवपार्वतीमन्दिरम्- प्रचण्डग्रीष्मेऽपि अनुभूयते शीतलता



हिमसंस्कृतवार्ताः- टिटलागढम् (ओडिशा)। भारतवर्षे नैकानि रहस्यमयानि धार्मिकस्थलानि सन्ति, यत्र दिव्यशक्तेः सान्निध्यमिव अनुभूयते। तेषु ओडिशाराज्यस्य टिटलागढनगरे स्थितं भगवान् शिवस्य पार्वत्याश्च प्राचीनं मन्दिरम् अत्यन्तं कौतूहलजनकम् अस्ति। अस्य मन्दिरस्य विशेषता एषा यत् बहिर् भीषणग्रीष्मेऽपि मन्दिरस्य अन्तः शीतलतायाः सुखदः अनुभवः भवति।

ओडिशाराज्यस्य टिटलागढप्रदेशः ग्रीष्मकाले अत्यधिकतापमानस्य कृते प्रसिद्धः अस्ति। विशेषतः तत्र स्थितः कुम्हडा पर्वतः तीव्रसूर्यतापेन तप्तः भवति। अस्य पर्वतस्य शिलाः सूर्यस्य प्रखरकिरणैः अत्यन्तम् उष्णाः भवन्ति। किन्तु अस्यैव पर्वतस्योपरि स्थिते शिवपार्वतीमन्दिरे प्रवेशमात्रेण वातावरणे विलक्षणः परिवर्तनः अनुभूयते। अस्य मन्दिरस्य आश्चर्यजनकं वैशिष्ट्यम् इदम् अस्ति यत् अत्र शीतलतायाः अनुभवाय न शीतकयन्त्रस्य आवश्यकता अस्ति, न वा वातानुकूलनयन्त्रस्य। तथापि मन्दिरस्य अन्तः तापमानं तुलनात्मकरूपेण सुखदं शीतलं च भवति इति स्थानीयजनाः कथयन्ति।

विशेषतः मई-जूनमासयोः यदा बहिः तापमानं अत्यधिकं वर्धते, तदा मन्दिरस्य अन्तः शीतलतायाः अनुभूतिः अधिका भवति। कदाचित् तु ग्रीष्मर्तौ अपि भक्ताः शीतनिवारणाय कम्बलम् आवरणरूपेण उपयुञ्जते इति कथ्यते। अस्य मन्दिरस्य अपरं वैशिष्ट्यम् इदम् अस्ति यत् मन्दिरस्य बहिः स्थिताः शिलाः अत्यन्तम् उष्णाः भवन्ति, किन्तु कतिपयपदानाम् अन्तराले स्थितस्य मन्दिरस्य अन्तः वातावरणं शीतलम् अनुभूयते। एवं बहिर् भीषणतापः, अन्तस्तु सुखदशीतलता इयं विपरीतपरिस्थितिः सर्वेषां दर्शनार्थिनां मनसि विस्मयं जनयति। अतः टिटलागढस्य कुम्हडा पर्वतस्थं शिवपार्वतीमन्दिरं धार्मिकश्रद्धायाः केन्द्रत्वेन सह प्राकृतिकवैचित्र्यस्य अपि अद्भुतं उदाहरणम् अस्ति। अस्य रहस्यमयस्य शीतलतायाः कारणं वैज्ञानिकदृष्ट्या सम्यगनुसन्धानस्य विषयः अपि वर्तते।

झाँसीमण्डले बृहत्

आजीविकामेलायाः आयोजनम्

२३ नवम्बरदिनाङ्के,

पञ्चविंशत्यधिकद्विसहस्रं रिक्तपदानि पूरयितुं चयनावसरः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, झाँसी। उत्तरप्रदेश- आजीविकामिशनस्य अन्तर्गतं क्षेत्रीयसेवा- योजनाकार्यालयस्य, झाँसी इत्यस्य तत्त्वावधाने २०२६ तमस्य वर्षस्य नवम्बरमासस्य २३ दिनाङ्के (सोमवासरे) बृहत् आजीविकामेलायाः आयोजनं भविष्यति। अस्मिन् मेलायां देशविदेशयोः प्रतिष्ठिताभिः त्रिंशदधिकाभिः कम्पनीभिः सहकार्येण पञ्चविंशत्यधिकद्विसहस्रं रिक्तपदानां कृते अभ्यर्थिनां चयनस्य अवसरः प्रदास्यते। समग्रतया त्रिसहस्राधिकाः आजीविकाावसराः उपलब्धाः भविष्यन्ति। अस्य आजीविकामेलायाः आयोजनस्थलं झाँसीनगरस्थं बुन्देलखण्डमहाविद्यालयस्य (बी.के.डी.) चौराहासमीपवर्तिप्राङ्गणं भविष्यति।

आजीविकामेलायाः प्रमुखविशेषताः-

- त्रिंशदधिकाः प्रतिष्ठिताः कम्पन्यः सहभागिन्यः भविष्यन्ति।
- पञ्चविंशत्यधिकद्विसहस्रं रिक्तपदानि उपलब्धानि सन्ति।
- चयनितेभ्यः अभ्यर्थिभ्यः प्रतिमासं दशसहस्ररूप्यकतः पञ्चत्रिंशत्सहस्ररूप्यकपर्यन्तं वेतनं प्रदास्यते।
- अभ्यर्थिनां वयोमर्यादा अष्टादशवर्षतः चत्वारिंशद्वर्षपर्यन्तं निर्धारितास्ति।
- देशस्य विदेशस्य च विभिन्नेषु स्थानेषु आजीविकास्य अवसराः प्राप्स्यन्ते।

शैक्षणिकयोग्यता-

अस्मिन् आजीविकामेलायाम् उच्चविद्यालयः, उच्चतरमाध्यमिकशिक्षा, स्नातकः, स्नातकोत्तरः, व्यवसायप्रशासनस्नातकः (बी.बी.ए.), सङ्गणकप्रयोगस्नातकः (बी.सी.ए.), अभियान्त्रिकस्नातकः (बी.टेक्), पॉलिटेक्निक्, औद्योगिक- प्रशिक्षणसंस्थानस्य प्रमाणपत्रधारिणः (आई.टी.आई.), व्यवसायप्रशासनस्नातकोत्तरः (एम.बी.ए.), सङ्गणकप्रयोगस्नातकोत्तरः (एम.सी.ए.), सङ्गणकविषये दक्षतां प्राप्ताः अभ्यर्थिनः भागं ग्रहीतुं शक्नुवन्ति।

पञ्जीकरणस्य प्रक्रिया-

इच्छुकाः अभ्यर्थिनः 'आजीविकासङ्गम' इति अनुप्रयोगं स्वचलदूरभाषे अवतार्य अथवा rojgaarsangam.up.gov.in इति जालपुटे स्वपञ्जीकरणं कुर्वन्तु। विशेषविवरणार्थं १५५३३० इति दूरभाषसहायतासङ्ख्यायां सम्पर्कः कर्तुं शक्यते। उल्लेखनीयमस्ति यत् आजीविकामेलायां सहभागिता पूर्णतया निःशुल्का अस्ति। अतः झाँसीमण्डलस्य युवभ्यः स्वयोग्यतानुसारं आजीविकाावसरान् प्राप्तुं स्वर्णिमः अवसरः अयम्। अस्य अवसरस्य लाभं गृहीत्वा स्वस्य उज्ज्वलभविष्यस्य निर्माणे सक्रियतया प्रवर्तन्ताम्। अधिकविवरणार्थं linktr.ee/sewayojan इति जालसम्पर्कसूत्रं पश्यन्तु।

देवोत्थानैकादश्यां तुलसीसम्बद्धानि सप्त मङ्गलकार्याणि- धार्मिकश्रद्धया आचरन्तु भक्ताः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम् हिन्दूधर्मे एकादशीव्रतस्य विशेषं धार्मिकं महत्त्वं विद्यते। कार्तिकमासस्य शुक्लपक्षे समायान्ती एकादशी प्रबोधिनी एकादशी, देवोत्थानैकादशी, देवप्रबोधिनी एकादशी इत्यादिभिः नामभिः प्रसिद्धा अस्ति। धार्मिकमान्यतानुसारम् आषाढमासस्य शुक्लपक्षीयायां देवशयनी एकादश्यां भगवान् श्रीविष्णुः क्षीरसागरे योगनिद्रां गच्छति। ततः चतुर्मासानन्तरं कार्तिकमासस्य शुक्लपक्षीयायाम् एकादश्यां पुनः जागरितो भवति।

भगवतः श्रीविष्णोः प्रबोधनानन्तरं विवाहः, मुण्डनसंस्कारः, गृहप्रवेशः इत्यादीनि सर्वाणि माङ्गलिककार्याणि पुनः प्रारभ्यन्ते। अतः अस्याः तिथेः धार्मिकं महत्त्वं विशेषरूपेण वर्तते।

तुलसीविवाहस्य विशेषं महत्त्वम्

अस्मिन् पवित्रे दिने भगवान् श्रीविष्णोः शालग्रामस्वरूपस्य भगवत्याः तुलस्याश्च विवाहसम्पादनस्य प्राचीनः धार्मिकः सम्प्रदायः अस्ति। अयं विवाहः तुलसीविवाहः इति नाम्ना प्रसिद्धः अस्ति, सम्पूर्णे भारते श्रद्धया हर्षोल्लासेन च आचर्यते। धार्मिकमान्यतानुसारं येषां दम्पतीनां गृहे कन्या नास्ति, ते यदि अस्मिन् दिने तुलसीविवाहम् आयोजयन्ति, तर्हि कन्यादानसदृशं महापुण्यं प्राप्नुवन्ति। विधिपूर्वकं तुलसीविवाहस्य सम्पादनेन दाम्पत्यजीवनस्य विघ्नाः दूरीभवन्ति, गृहे सुखशान्तिः प्रवर्धते, भगवतः श्रीविष्णोः भगवत्याः लक्ष्म्याश्च अनुग्रहः भवति इति धार्मिकः विश्वासः अस्ति।

देवोत्थानैकादश्यां तुलसीसम्बद्धानि सप्त मङ्गलकार्याणि

१. तुलसीदेव्यै रक्तवर्णीयां चीरिकां समर्पयन्तु।

अस्मिन् पवित्रे दिने तुलसीदेव्याः शृङ्गारः अत्यन्तं शुभफलदायकः मन्यते। प्रातः स्नानादिकं समाप्य तुलसीवृक्षाय स्वच्छं जलम् अर्पयन्तु। ततः तुलसीदेव्यै नूतनां रक्तवर्णीयां चीरिकां समर्पयन्तु। धार्मिकविश्वासानुसारम् अनेन अखण्डसौभाग्यस्य आशीर्वादः प्राप्यते तथा गृहे सकारात्मकायाः ऊर्जायाः सञ्चारः भवति।

२. पीतसूत्रे एकादश ग्रन्थीः कृत्वा बध्नन्तु।

भगवतः श्रीविष्णोः प्रियः वर्णः पीतः अस्ति। अतः अस्मिन् दिने पीतवर्णस्य विशेषं महत्त्वं वर्तते। एकं स्वच्छं पीतवर्णीयं कार्पाससूत्रं गृहीत्वा स्वमनोकामनां स्मरन्तः तस्मिन् एकादश ग्रन्थीः रचयन्तु। ततः श्रद्धया तत् सूत्रं तुलसीवृक्षस्य काण्डे बध्नन्तु। धार्मिकमान्यतानुसारम् अनेन अवरुद्धानि कार्याणि सिद्ध्यन्ति तथा आर्थिकस्थितिः सुदृढा भवति।

३. तुलसीमूले गोदुग्धम् अर्पयन्तु, घृतदीपं च प्रज्वालयन्तु।

अस्मिन् दिने पूजाविधौ तुलसीदेव्यै गोदुग्धार्पणं पुण्यप्रदं मन्यते। तुलसीवृक्षस्य मूले अल्पमात्रायां कच्चं गोदुग्धम् अर्पयन्तु। ततः समीपे शुद्धेन गोघृतेन दीपं प्रज्वालयन्तु। धार्मिकविश्वासानुसारम् अनेन भगवती लक्ष्मीः प्रसन्ना भवति तथा गृहे धनधान्यस्य समृद्धिः भवति।

४. श्रीकृष्णाय एकादश तुलसीदलानि समर्पयन्तु।

भगवतः श्रीविष्णोः अवतारस्य श्रीकृष्णस्य तुलसीदलानि अत्यन्तं प्रियाणि सन्ति। तुलसीदलैः विना भगवतः भोगः अपूर्णः मन्यते। अतः देवोत्थानैकादश्यां पूजासमये श्रीकृष्णाय अथवा शालग्रामशिलायै मिष्टान्नेन अथवा नवनीतेन सह एकादश तुलसीदलानि समर्पयन्तु। विशेषतया ध्यातव्यं यत् एकादश्यां तुलसीपत्राणि न चिन्वन्ति। अतः पूजायै आवश्यकानि पत्राणि पूर्वदिने एव सञ्चिनुयुः।

५. 'ॐ नमो भगवते वासुदेवाय' इति महामन्त्रं जपन्तु।

अस्मिन् पुण्यदिने तुलसीवृक्षस्य समीपे आसनम् आस्तीर्य शान्तचित्तेन उपविशन्तु। ततः भगवतः श्रीविष्णोः महामन्त्रस्य 'ॐ नमो भगवते वासुदेवाय' इत्यस्य न्यूनातिन्यूनम् एकादशवारं जपं कुर्वन्तु। इच्छानुसारं तुलसीमालया अष्टोत्तरशतवारम् अपि मन्त्रजपं कर्तुं शक्नुवन्ति। धार्मिकमान्यतानुसारम् अनेन मानसिकशान्तिः प्राप्यते तथा जीवनस्य कष्टानि न्यूनीभवन्ति।

६. रक्षासूत्रं बध्वा परिवारस्य कल्याणं प्रार्थयन्तु।

हिन्दूधर्मे रक्षासूत्रं मङ्गलस्य रक्षणस्य च प्रतीकं मन्यते। देवोत्थानैकादश्याः पूजाविधौ तुलसीवृक्षस्य



परितः रक्तवर्णीयं पीतवर्णीयं वा रक्षासूत्रं बध्नन्तु। ततः करौ संयोज्य परिवारस्य सुखशान्त्यै, उत्तमस्वास्थ्याय, समृद्धये च भगवन्तं प्रार्थयन्तु। धार्मिकविश्वासानुसारम् अनेन परिवारस्य कल्याणाय मङ्गलभावना वर्धते।

७. सायंकाले तुलसीदेव्याः प्रदक्षिणां कुर्वन्तु।

सायंकाले तुलसीवृक्षस्य समीपे शुद्धेन गोघृतेन दीपं प्रज्वालयन्तु। दीपप्रज्वालनानन्तरं तुलसीदेव्याः सप्त अथवा एकादशवारं श्रद्धापूर्वकं प्रदक्षिणां कुर्वन्तु। धार्मिकमान्यतानुसारम् अस्मिन् पुण्यदिने तुलसीप्रदक्षिणया गृहस्य नकारात्मकता दूरीभवति तथा परिवारे सुखसमृद्धिः, शान्तिः, सौहार्दं च वर्धते।

धार्मिकसन्देशः- देवोत्थानैकादशी केवलम् एकं व्रतपर्व नास्ति, अपि तु श्रद्धायाः, भक्तेः, पवित्रतायाः, पारिवारिकमङ्गलस्य च महत्त्वपूर्णः उत्सवः अस्ति। अतः भक्ताः श्रद्धया भगवन्तं श्रीविष्णुं तुलसीदेवीं च सम्पूजयन्तु तथा सर्वेषां कल्याणाय प्रार्थनां कुर्वन्तु।

संस्कृतक्षेत्रे आजीविकास्य नूतनाः सम्भावनाः- शिक्षक- प्रशिक्षणकार्यक्रमे विदुषा विचाराः प्रस्तुताः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेश- संस्कृतसंस्थानम्, लखनऊ, उत्तरप्रदेश- माध्यमिक- संस्कृतशिक्षापरिषदः, लखनऊ इत्यनयोः संयुक्तत्त्वावधाने २०२६ तमस्य वर्षस्य नवम्बरमासस्य अष्टादशदिनाङ्कतः द्वाविंशतिदिनाङ्कपर्यन्तं पञ्चदिवसीयः आवासीयः उत्तरप्रदेश- माध्यमिक- संस्कृत- शिक्षक- प्रशिक्षणकार्यक्रमः समायोजितः।

अस्मिन् प्रशिक्षणकार्यक्रमे संसाधकत्वेन प्रशिक्षकत्वेन च सहभागितायाः अवसरः प्राप्तः। तत्र 'संस्कृते आजीविकास्य सम्भावनाः' इति विषये आयोजिते चर्चासत्रे प्रशिक्षकरूपेण स्वकीयाः विचाराः प्रस्तुताः। चर्चायां संस्कृतस्य पारम्परिकाध्ययनस्य सहैव आधुनिकशिक्षायाम्, अनुसन्धानक्षेत्रे, अनुवादकार्ये, प्रौद्योगिक्यां, कृत्रिमबुद्धिमत्तायाः क्षेत्रे च उपलब्धानां आजीविकाावसराणां स्वावलम्बनस्य च सम्भावनानां विषये विस्तृतः विचारविनिमयः अभवत्। अस्मिन् सत्रे संस्कृतभाषा केवलं पारम्परिकाध्ययनस्य विषयः न, अपि तु ज्ञानस्य, कौशलस्य, नवाचारस्य, स्वावलम्बनस्य, आजीविकायाश्च व्यापकं साधनम् अस्ति इति दृष्ट्वा तस्याः अध्ययनस्य आवश्यकता विशेषतया प्रतिपादिता।

कार्यक्रमस्य सफलायोजने योगदानं दत्तवद्भ्यः आयोजकसंस्थाभ्यः, कार्यक्रमसंयोजकेभ्यः, उपस्थितेभ्यः समस्तेभ्यः विद्वद्भ्यः शिक्षकसहकारिभ्यश्च हार्दिकं कृतज्ञतापूर्वकं धन्यवादं समर्पितम्।



वीराङ्गना- राज्ञी- लक्ष्मीबाई- जन्मजयन्त्यवसरे

अखिलभारतीय- विद्यार्थिपरिषदा विविधाः कार्यक्रमाः समायोजिताः



हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, भागलपुरम्। वीराङ्गनायाः राज्ञी लक्ष्मीबाईमहोदयायाः जन्मजयन्त्यवसरे अखिलभारतीय-विद्यार्थिपरिषदः बिहारराज्यस्य भागलपुरनगर-इकाईमाध्यमेन विविधाः कार्यक्रमाः आयोजिताः। अस्मिन् क्रमे नगरे धावनप्रतियोगिता, सम्मानसमारोहः समायोजितः, यस्मिन् बहुसंख्याकाः छात्राः छात्राश्च सोत्साहं भागं गृहीतवन्तः। आयोजितायां धावन-प्रतियोगितायां प्रतिभागिभिः स्वप्रतिभायाः, ऊर्जायाः, उत्साहस्य च उत्कृष्टं प्रदर्शनं कृतम्। प्रतियोगितायां प्रथमं, द्वितीयं, तृतीयं, दशश्रेष्ठस्थानानि प्राप्तवन्तः प्रतिभागिनः परिषदः पक्षतः पुरस्कारैः सम्मानिताः। एतदतिरिक्तं नगरस्य टीएनबी. महाविद्यालयस्य, मारवाडी-महाविद्यालयस्य परिसरे वीराङ्गनायाः राज्ञीलक्ष्मीबाई- महोदयायाः चित्रे पुष्पाञ्जलिं समर्प्य तस्यै भावपूर्णा श्रद्धाञ्जलिः अर्पिता। अस्मिन् अवसरे जिलासंयोजकः पीयूष भारती अवदत् यत् राज्ञी लक्ष्मीबाई केवलं नाममात्रं न, अपि तु भारतस्य प्रत्येकं कन्यायै साहसस्य, स्वाभिमानस्य, राष्ट्रभक्तेः च जीवन्तं प्रेरणास्रोतः अस्ति। केवलं त्रयोविंशतिवर्षीयायुषि एव आङ्ग्लशासनस्य विरुद्धं संघर्षं कृत्वा तया प्रमाणितं यत् भारतस्य कन्याः साहसेन दृढसङ्कल्पेन च प्रत्येकम् आपदं सम्मुखीकर्तुं समर्थाः सन्ति तथा नेतृत्वदायित्वमपि कुशलतया निर्वोढुं शक्नुवन्ति। सः अग्रे अवदत् यत् राज्ञी लक्ष्मीबाईमहोदयायाः जीवनं वर्तमानयुवसन्तत्यै, विशेषतः छात्राणां छात्राणां च कृते महान् प्रेरणास्रोतः अस्ति। तस्याः संघर्षस्य, समर्पणस्य, देशप्रेम्णः च आदर्शान् स्वजीवने आत्मसात्करणमेव तस्यै कृते श्रद्धाञ्जलिः भविष्यति। कार्यक्रमस्य माध्यमेन छात्रेषु राष्ट्रप्रेम्णः, साहसस्य, आत्मसम्मानस्य तथा नारीशक्तेः भावनायाः जागरणस्य सन्देशः प्रसारितः। अस्मिन् कार्यक्रमे जिला-विस्तारकः राजीव रञ्जनकुमारः, विभाग-संयोजकः सूर्या प्रतापः, नवीन यादवः, कुणालः, प्रणवः, शिवम्, अनमोलः, दिव्यांशुः, मृणालः, आशीषः च सहितं परिषदः बहुसंख्यकाः कार्यकर्तारः उपस्थिताः आसन्।

विश्वदर्शनदिवसोपलक्ष्ये कुमारभास्करवर्मा- संस्कृत-पुरातनाध्ययनविश्वविद्यालये विशेषव्याख्यानकार्यक्रमः



हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः, नलबाडी, जीवनस्य विविधप्रत्याह्वानैः सह सामनां कर्तुं दार्शनिकचिन्तनस्य, युक्तिवादिदृष्टिकोणस्य, नैतिकतायाः मानवीयमूल्यबोधस्य च महत्त्वविषये जागरूकतां जनयितुं कुमारभास्करवर्म- संस्कृत-पुरातनाध्ययन-विश्वविद्यालयस्य दर्शनविभागस्य 'जिज्ञासा संस्था' इत्यस्याः उद्योगेन विश्वदर्शनदिवसः २०२६ समायोजितः। अस्मिन् अवसरे विश्वविद्यालये विशेषव्याख्यानकार्यक्रमस्य आयोजनं कृतम्।

कार्यक्रमस्य शुभारम्भं विश्वविद्यालयस्य सम-उपकुलपतिः आचार्या मल्लिका कलिता अकरोत्। अंशकालिकाचार्या निकुमणि डेका इत्यनया सञ्चालिते गाम्भीर्यपूर्णे कार्यक्रमे दर्शनविभागाध्यक्षः आचार्यः विकासभार्गवशर्मा स्वागतभाषणं प्रदत्तवान्, विभागस्य सहायकाचार्या डॉ. पापरि बरुआ च कार्यक्रमस्य उद्देश्यं व्याख्यातवती।

कार्यक्रमे संसाधनव्यक्तिरूपेण उपस्थित्वा विश्वविद्यालयस्य शिक्षाविभागाध्यक्षा आचार्या अलका दासा "The Art of Living: Philosophical Insights for Contemporary Challenges" इति शीर्षके मननशीलं सार्थकं च व्याख्यानम् अयच्छत्।

स्वीये वक्तव्ये आचार्या दासा समकालीनसमाजे मानवजीवने च विविधप्रत्याह्वानैः सह सामनां कर्तुं दार्शनिकचिन्तनस्य असीममहत्त्वं प्रकाशितवती। विशेषतः नवपीढ्यां दृश्यमानायाः विफलताभयस्य, आत्मविश्वासाभावस्य, मानसिकचापस्य च विविधकारणानि विश्लिष्य जीवनं प्रति सकारात्मकदृष्टिकोणनिर्माणे बलम् अयच्छत्।

भारतीयदर्शनस्य आत्मोपलब्धिः आत्मज्ञानं च इत्येतयोः धारणां निर्दिश्य आचार्या दासा छात्रछात्रीः जीवनस्य प्रतिकूलपरिस्थितीनां सम्मुखीकरणाय मानसिकरूपेण सज्जाः भवितुं, आत्मविश्वासेन, विवेकेन, सकारात्मकचिन्तनेन च अग्रे गन्तुम् उपदेशं दत्तवती।

उल्लेखनीयं यत् यूनेस्को इत्यनेन २००५ वर्षे नवम्बरमासस्य तृतीयः बृहस्पतिवारः 'विश्वदर्शनदिवसः' इति रूपेण पालनीयः इति निर्णयः गृहीतः। दर्शनस्य अध्ययनचर्चाभ्यां मुक्तचिन्तनस्य, युक्तिनिष्ठदृष्टिकोणस्य, परस्परसम्मानस्य, सहिष्णुतायाः मानवीयमूल्यबोधस्य च विकासः एव अस्य दिवसस्य अन्यतमं मुख्यम् उद्देश्यम् अस्ति।

अयं विशेषव्याख्यानकार्यक्रमः शिक्षार्थिषु दर्शनं प्रति रुचिं वर्धयित्वा जीवनसमाजयोः विविधसमस्यानां युक्त्या, विवेकेन, मानवीयदृष्टिकोणेन च विश्लेषणाय स्वस्थचिन्तनशीलपरिवेशं निर्मितवान्। कार्यक्रमस्य अन्ते दर्शनविभागस्य सहायकाचार्या रुमि वैश्यः धन्यवादं ज्ञापितवती।

क्रिकेट-क्रीडा-वर्णन-गीतम्

मम हस्ते अस्ति कन्दुकं, तव हस्ते अस्ति वल्लः ।
आयन्तु भोः मित्राणि, सर्वे वयं क्रीडामः॥
ताडय ततः कन्दुकम् अहम् इतः इदं क्षिपामि।
पृष्ठतो भूत्वा त्रिदण्डात् ध्यानेन सदा गृह्णामि।
परितः सन्ति ते गृह्णन्तु।
कन्दुकं विलुठति भूमौ, तद् दूरं धावति शीघ्रम्॥ १॥
आयन्तु भोः------
विजयस्य न कश्चित् गर्वः, न पराजयचिन्ता कार्या।
पर्यायतः चलति व्यवस्था प्रकृत्या हि एषा अनिवार्या।
उच्छलति कन्दुकं गगने षट्कं सम्भवति इदानीम्।
गृहाण गृहाण धावित्वा क्षिप क्षिप क्षिप ततः तदानीम्।
धावनाङ्काः तु वर्धन्ते।
धावतु धावतु वेगेन कतिचन स्युः अङ्काः लब्धाः ॥ २॥
आयन्तु भोः------
(गीतमाध्यमेन संस्कृतशिक्षणस्य एकं निदर्शनम्)

धनञ्जयः शास्त्री हरिनगरम् देहली

युवभ्यः प्रौद्योगिक्याः उपहारः,

अङ्कीय- सशक्तीकरणाय नवगतिः



स्वामीविवेकानन्द- युवा- सशक्तीकरण-योजनान्तर्गतं पञ्चाशत्सहस्राधिकेभ्यः छात्रेभ्यः प्रशिक्षणार्थिभ्यश्च सङ्गणकपट्टिकानां वितरणम्।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, गोरखपुरम्, २० नवम्बरः। प्रधानमन्त्रिणः नरेन्द्रमोदिनः मार्गदर्शने मुख्यमन्त्रिणः योगी आदित्यनाथस्य नेतृत्वे च उत्तरप्रदेशसर्वकारः युवानः आधुनिकप्रौद्योगिक्या सह संयोज्य तेषाम् उज्ज्वलभविष्यस्य सुदृढं आधारं निर्माति। शिक्षया कौशलविकासेन च सह युवभ्यः अङ्कीयसंसाधनानि प्रदाय तान् स्वावलम्बिनः कर्तुं सर्वकारः संकल्पबद्धः अस्ति। अस्यामेव दिशि महायोगिगुरुगोरक्षनाथस्य पावनभूमौ गोरखपुरे स्वामीविवेकानन्द- युवा- सशक्तीकरण-योजनायाः अन्तर्गतं पञ्चाशत्सहस्राधिकेभ्यः छात्रेभ्यः छात्राभ्यश्च प्रशिक्षणार्थिभ्यश्च सङ्गणकपट्टिकाः वितरिष्यन्ते।

गोरखपुर- देवरिया- कुशीनगर- महराजगञ्ज-जनपदानां च युवभ्यः प्रदीयमाना एषा अङ्कीयोपहाररूपा सुविधा तेषां शिक्षायाः, कौशलविकासस्य, प्रौद्योगिकीदक्षतायाश्च उन्नतौ महत्त्वपूर्णां भूमिकां निर्वक्ष्यति। प्रदेशसर्वकारेण पञ्चविंशतिलक्ष- सङ्गणकपट्टिकानां वितरणलक्ष्यं शीघ्रं प्राप्तुं कार्यं प्रवर्तितम् अस्ति। अस्याः योजनायाः माध्यमेन युवानः अङ्कीयदृष्ट्या समर्थाः भविष्यन्ति। एषा महत्त्वपूर्णा योजना युवभ्यः ज्ञानस्य, नवाचारस्य, आजीविकास्य च नवीनावसरान् उद्घाटयिष्यति। अङ्कीयसंसाधनानाम् उपलब्ध्या विद्यार्थिनः आधुनिकशिक्षया सह सम्बद्धाः भविष्यन्ति, विकसितोत्तरप्रदेशस्य निर्माणे च स्वकीयां महत्त्वपूर्णां भूमिकां निर्वहिष्यन्ति।

शिक्षकः एव सर्वदा प्रश्नानां लक्ष्यं किमर्थम्?

शिक्षकस्य दायित्वानां सह

तस्याधिकाराणामपि संरक्षणम् आवश्यकम्



शिक्षकस्य अभिलेखान् परीक्षध्वं यतः सत्यापनानन्तरमेव वेतनस्य वितरणं कृतम्। तर्हि प्रश्नः शिक्षकं प्रति एव किमर्थम्? असत्यसत्यापनं केन कृतम्, तस्य उत्तरदायित्वं कस्य?

- वृजेशकुमारपाण्डेयः

विद्यालयं निरीक्षध्वम्। शिक्षकः विद्यालयं परित्यज्य प्रशिक्षणार्थं, जनसभासु सहभागितार्थं तथा अन्यविभागीयकार्याणि कर्तुं किमर्थं गतवान्? इति प्रश्नः पृच्छ्यते। विद्यालयेषु स्वच्छता नास्ति चेत् शिक्षकः एव दोषी कथ्यते। किन्तु स्वच्छताकार्यस्य उत्तरदायित्वं येषां कर्मचारिणां वर्तते, तेषां प्रति प्रश्नः किमर्थं न उत्थाप्यते?शिक्षकः अध्यापनं न करोति इति आरोपः क्रियते। किन्तु सः जनगणनाकार्ये, मतदानकेन्द्र- स्तरीयाधिकारिरूपेण, विशेष-गहन- पुनरीक्षणकार्ये, निर्वाचनकार्ये च नियोजितः किमर्थम्? एतस्य उत्तरं कः दास्यति? शासकीयविद्यालयेषु शिक्षकः स्वसन्ततीः किमर्थं न पाठयति? इत्यपि प्रश्नः शिक्षकेभ्यः एव पृच्छ्यते।

यदा किमपि कूटकरणं भवति, तदा शिक्षकः दोषी। विद्यालये अव्यवस्था भवति, तदा शिक्षकः दोषी। अन्यविभागीयकार्येषु शिक्षकः नियुज्यते, तदापि शिक्षकः दोषी। तैः कार्यैः अध्यापनकार्यं बाधितं भवति, तदापि शिक्षकः एव दोषी!

अहो! कीदृशी विचित्रा प्रशासनव्यवस्था! अस्तु, शिक्षकबन्धवः! भवन्तः सर्वाणि कार्याणि कुर्वन्तु। अध्यापनं कुर्वन्तु, जनगणनां कुर्वन्तु, मतदानकेन्द्र- स्तरीयाधिकारिरूपेण दायित्वं निर्वहन्तु, विशेषगहनपुनरीक्षणकार्यं कुर्वन्तु, निर्वाचनं सम्पादयन्तु, प्रशिक्षणेषु भागं गृह्णन्तु, एतेषां सर्वेषां कार्याणां मध्ये स्वकीयम् अध्यापनदायित्वमपि निर्वहन्तु। सर्वेषां प्रश्नानाम् उत्तराणि ददतु, अपमानवचनानि च सहध्वम्।

किन्तु शिक्षकाणां वेतनं, वेतनस्य अवशिष्टराशिः, चयनवेतनमानं, पदोन्नतिः च कदा प्राप्स्यते? एतेषां कृते तु निश्चितः कालावधिः अपि नास्ति! अपरतः विभागाय यदा कश्चन दत्तांशः अपेक्षितः भवति, तदा सः तत्कालमेव प्रदातव्यः। अन्तिमतिथिः सप्ताहानन्तरम् अस्ति चेत् अपि आदेशः अद्य निर्गतः, अतः उत्तरमपि अद्यैव अपेक्षितम्! अन्यथा दण्डात्मककार्यवाहीं सम्मुखीकर्तुं सज्जाः भवत।

किन्तु प्रशासनव्यवस्थां प्रति अपि एकः प्रश्नः-

किं शिक्षकः केवलं दायित्वनिर्वहणाय एव अस्ति, उत तस्यापि स्वकीयाः अधिकाराः सन्ति?

किं शिक्षकस्य सम्मानस्य, समयस्य, सुविधानां तथा दीर्घकालात् लम्बमानानां सेवासम्बद्ध-प्रकरणानां च उत्तरदायित्वं कस्यचित् निश्चितं भविष्यति? यदि शिक्षकेभ्यः प्रत्येकं कार्यं समये एव अपेक्ष्यते, तर्हि तेषां न्यायोचिताः अधिकाराः अपि समये एव प्रदातव्याः। अन्ततः कियत्कालपर्यन्तं शिक्षकः सर्वासां व्यवस्थागत-विफलतानां सर्वसुलभं लक्ष्यं भविष्यति?

शिक्षकः न काऽपि यन्त्रमात्रम्, अपि तु राष्ट्रनिर्माणस्य महत्त्वपूर्णतमः आधारस्तम्भः अस्ति। तस्य गौरवस्य, अधिकाराणां, समयस्य, आत्मसम्मानस्य च रक्षणमपि समानरूपेण आवश्यकम्। अस्तु, एषः क्रमः कियत्कालं यावत् प्रचलिष्यति इति न ज्ञायते, किन्तु अन्यायस्य विरुद्धं प्रश्नोत्थापनं निरन्तरं प्रचलिष्यते। यतः शिक्षकस्य सम्मानः न कस्यापि उपकारः, अपि तु तस्य जन्मसिद्धः अधिकारः अस्ति। जयतु शिक्षकसमाजः! जयतु भारतम्! जयतु राष्ट्रनिर्माता शिक्षकः!

भूमिक्रय-विक्रयस्य

पञ्जीकरणप्रक्रिया भविष्यति सरला, साक्षिणाम् अनिवार्यता समाप्तुं शासनस्य सज्जता

क्रेतुः विक्रेतुः च आधार- जैवमितीय-सत्यापनाधारेणैव भविष्यति सम्पत्तेः पञ्जीकरणम्, समयस्य श्रमस्य च रक्षणं सम्भावितम्।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। भूमेः, गृहस्य, कृषिक्षेत्रस्य अथवा अन्यसम्पत्तेः क्रयविक्रयसम्बद्धा पञ्जीकरणप्रक्रिया शीघ्रमेव सरला भवितुमर्हति। वर्तमानव्यवस्थायां सम्पत्तेः विक्रयपत्रस्य पञ्जीकरणाय क्रेतुः विक्रेतुः च अतिरिक्तं द्वयोः साक्षिणोः उपस्थितिः अनिवार्या अस्ति। किन्तु अधुना शासनं साक्षिणाम् अनिवार्यतां समाप्तुं सज्जतां कुर्वद् अस्ति। एषा नूतना व्यवस्था प्रवर्तमाना चेत् क्रेता विक्रेता च परस्परं सम्पत्तेः क्रयविक्रयसम्बद्धं पञ्जीकरणं सरलतया कर्तुं शक्ष्यतः।

वर्तमानपञ्जीकरणप्रक्रिया दीर्घकालिकी

सम्पत्तेः क्रयविक्रयार्थं सम्प्रति प्रथमं अन्तर्जालमाध्यमेन समयनिर्धारणं (स्लॉट-बुकिङ्ग) करणीयम्। ततः निर्धारितसमये क्रेता विक्रेता च द्वाभ्यां साक्षिभ्यां सह पञ्जीकरणकार्यालयम् उपस्थातव्यौ भवतः। कार्यालये क्रेतुः विक्रेतुः च आधारपत्राधारितं जैवमितीयसत्यापनं क्रियते।अस्मिन्नेव क्रमे साक्षिणोः अपि आधारपत्रमाध्यमेन अङ्गुलिचिह्नानां तथा नेत्रमणिकायाः (आइरिस) परीक्षणं, प्रत्यक्षचित्रेण सह परिचयस्य सत्यापनं च करणीयम्। एतस्याः विस्तृतप्रक्रियायाः कारणेन बहुसमयः व्ययितः भवति।

नूतनव्यवस्थायाः प्रमुखाः लाभाः-

शासनस्य प्रस्ताविताया व्यवस्थायां साक्षिणाम् अनिवार्यता समाप्ता भविष्यति चेत् केवलं क्रेतुः विक्रेतुः च आधार-जैवमितीयसत्यापनस्य माध्यमेन सम्पत्तेः पञ्जीकरणं कर्तुं शक्यते।

१. साक्षिणाम् अन्वेषणस्य समस्या समाप्ता- पञ्जीकरणसमये द्वौ साक्षिणौ अन्वेष्टुं, तौ सह आनेतुं च आवश्यकता न भविष्यति।

२. समयस्य अवकाशस्य च रक्षणम्- विशेषतः सेवायोजितानां जनानां कृते पुनः पुनः कार्यालयात् अवकाशं स्वीकृत्य साक्षिणः आनेतुं च आवश्यकता न्यूनीभविष्यति। पञ्जीकरणप्रक्रिया अपि शीघ्रतया सम्पन्ना भवितुमर्हति।

३. अङ्कीयसत्यापनं सुलभम्- आधार- ई-केवाईसी-माध्यमेन क्रेतुः विक्रेतुः च परिचयः प्रत्यक्षतया अङ्कीयरीत्या प्रमाणीकर्तुं शक्यते।

४. भविष्यत्कालीनविवादेषु न्यूनता- साक्षिणां साक्ष्येभ्यः निवृत्तिः, न्यायालये अनुपस्थितिः अथवा साक्ष्यसम्बद्धाः सम्भाविताः समस्याः न्यूनीकर्तुं शक्यन्ते।

सम्पत्तिपञ्जीकरणे नूतनसुविधायाः अपेक्षा

प्रस्तावित व्यवस्था कार्यान्विता भवति चेत् भूमेः गृहस्य च क्रयविक्रयप्रक्रियायां महत्त्वपूर्णः परिवर्तनः भविष्यति। क्रेतुः विक्रेतुः च कृते समयस्य श्रमस्य च रक्षणं भविष्यति, पञ्जीकरणकार्यालयेषु अनावश्यकप्रतीक्षायाः अपि निवारणं सम्भाव्यते।

उत्तरप्रदेशस्य सर्वेषु मतदानस्थलेषु नवम्बरमासस्य २१-२२ दिनाङ्क्योः विशेषाभियानदिवसौ आयोजयिष्येते

पात्रनागरिकाणां नामानि

मतदातृसूच्यां समावेशयितुं युवभ्यः महिलाभ्यश्च विशेषं प्राधान्यम्।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ, उत्तरप्रदेशस्य मुख्यनिर्वाचनाधिकारी कार्यालयेन सूचितं यत् अर्हतादिनाङ्कं २०२७ तमस्य वर्षस्य जनवरीमासस्य प्रथमदिनम् आधारीकृत्य विधानसभानिर्वाचनक्षेत्राणां निर्वाचकनामावलीनां विशेषसंक्षिप्तपुनरीक्षणम्- २०२७ प्रचलति। अस्य पुनरीक्षणस्य अन्तर्गतं दावानां आपत्तीनां च ग्रहणावधौ नागरिकानां सुविधार्थं प्रदेशस्य सर्वेषु मतदेयस्थलेषु विशेषाभियानदिवसाः आयोजयिष्यन्ते।एते अभियानदिवसाः २०२६ तमस्य वर्षस्य नवम्बरमासस्य २१ दिनाङ्के (शनिवासरे), २२ दिनाङ्के (रविवासरे), २८ दिनाङ्के (शनिवासरे), २९ दिनाङ्के (रविवासरे) भविष्यन्ति। एतेषाम् अभियानदिवसानां सुव्यवस्थितायोजनाय सर्वेभ्यः जनपद- निर्वाचनाधिकारिभ्यः निर्देशाः प्रदत्ताः सन्ति। भारतीय- निर्वाचनायोगस्य निर्देशानां पूर्णतया पालनमपि सुनिश्चितं करिष्यते।प्रातः दशवादनात् अपराह्णे चतुर्वादनपर्यन्तं बीएलओ- अधिकारिणः उपस्थिताः भविष्यन्ति।

बिहारराज्ये नूतनयोः प्राविधिकविश्वविद्यालययोः स्थापना,
कृत्रिमबुद्धिमत्तायाः सङ्गणकविज्ञानस्य च अध्ययनाय प्रोत्साहनम्



२०२६ तमे वर्षे शहीद् जुब्बा सहनी वास्तुकला- औद्योगिकाभियन्त्रण-विश्वविद्यालयस्य, डॉ. श्यामा प्रसाद मुखर्जी कृत्रिमबुद्धिमत्ता- सङ्गणकविज्ञान-विश्वविद्यालयस्य स्थापना

हिमसंस्कृतवार्ताः- राघवनाथ झा, पाटलिपुत्रम्

बिहारराज्ये विज्ञानस्य, प्राविधिकशिक्षायाः अनुसन्धानस्य च विकासाय राज्यसर्वकारेण शैक्षणिक- संस्थानानां विस्तारः क्रियते। अस्यैव क्रमे २०२६ तमे वर्षे राज्ये नूतनयोः प्राविधिक-विश्वविद्यालययोः स्थापना कृता। तयोः प्रथमः शहीद जुब्बा सहनी वास्तुकला-औद्योगिकाभियन्त्रण- विश्वविद्यालयः, द्वितीयश्च डॉ. श्यामाप्रसामुखर्जी कृत्रिमबुद्धिमत्ता-सङ्गणकविज्ञानविश्वविद्यालयः अस्ति। एतयोः विश्वविद्यालययोः स्थापनया युवभ्यः प्राविधिकशिक्षायाः, आधुनिकविषयाणाम् अध्ययनस्य अनुसन्धानस्य च नूतनाः अवसराः प्राप्यन्ते इति प्रत्याशा अस्ति।

शुक्रवासरे पाटलिपुत्रस्य सूचनाभवने स्थिते संवादकक्षे विज्ञान- प्राविधिकी-तकनीकीशिक्षाविभागेन आयोजिते वार्ताहरसम्मेलने विभागस्य उपलब्धीनां भावियोजनानां च विषये विस्तृतं विवरणं प्रस्तुतम्। विभागस्य मतानुसारं विज्ञानं प्राविधिकशिक्षा च विकसितसमाजस्य आर्थिकप्रगतेश्च आधारभूतस्तम्भौ स्तः। अतः राज्ये उच्चस्तरीयप्राविधिकशैक्षणिकसंस्थानानां विस्तारः क्रियते।

२०२२ तमे वर्षे बिहाराभियन्त्रण-विश्वविद्यालयस्य स्थापना

राज्ये प्राविधिकशिक्षायाः संस्थागतविकासाय २०२२ तमे वर्षे बिहाराभियन्त्रणविश्वविद्यालयस्य स्थापना कृता आसीत्। अस्य विश्वविद्यालयस्य अधीनं राज्यस्य अष्टात्रिंशत् सर्वकारीयाणि विंशतिः निजी अभियन्त्रणमहाविद्यालयानि च सन्ति। अनन्तरं २०२६ तमे वर्षे नूतनयोः विश्वविद्यालययोः स्थापनया प्राविधिकशिक्षाक्षेत्रे संस्थागतविस्तारस्य प्रक्रिया अग्रे वर्धिता।

१३४ बहुशिल्पशिक्षणसंस्थानेषु प्राविधिकशिक्षा

राज्यप्राविधिकशिक्षापरिषदः पाटलिपुत्रम् इत्यस्य स्थापना १९५५ तमे वर्षे अभवत्। अस्याः परिषदः अधीनं सम्प्रति सप्तचत्वारिंशत् सर्वकारीयाणि सप्ताशीतिः निजी बहुशिल्पशिक्षणसंस्थानानि च सञ्चालितानि सन्ति। एतेषां संस्थानानां माध्यमेन विद्यार्थिभ्यः प्राविधिकीं व्यावसायिकीं च शिक्षां प्रदीयते। अभियन्त्रणशिक्षया सह विविधेषु प्राविधिकक्षेत्रेषु कुशलमानवसंसाधनस्य निर्माणाय विशेषः प्रयत्नः क्रियते।

विज्ञानानुसन्धानक्षेत्रेऽपि संस्थागतविस्तारः

विज्ञानस्य अनुसन्धानस्य च प्रोत्साहनार्थं बिहारविज्ञानप्रौद्योगिकीपरिषदः स्थापना १९८४ तमे वर्षे कृता। अस्याः परिषदः अन्तर्गतं १९८८ तमे वर्षे बिहारदूरसंवेदनानुप्रयोगकेन्द्रस्य स्थापना अभवत्। अपरतः पाटलिपुत्रे दरभङ्गायां च नक्षत्रदर्शनकेन्द्राणि, गयायां क्षेत्रीयविज्ञानकेन्द्रस्य च स्थापना २०२३ तमे वर्षे कृता।

विभागस्य कथनानुसारम् एतेषां संस्थानानां विस्तारस्य प्रमुखम् उद्देश्यम् विद्यार्थिभ्यः उच्चशिक्षायाः, प्राविधिककौशलस्य अनुसन्धानस्य च उत्कृष्टतरान् अवसरान् उपलब्धान् कर्तुम् अस्ति। आधुनिकप्रौद्योगिक्याः, कृत्रिमबुद्धिमत्तायाः सङ्गणकविज्ञानस्य च इत्यादिषु नवोदितेषु क्षेत्रेषु शिक्षायाः प्रोत्साहनेन बिहारराज्यस्य युवभ्यः नूतनाः शैक्षणिकाः व्यावसायिकाश्च अवसराः सुलभाः भविष्यन्ति।

महावीरमन्दिरे श्रद्धाभक्त्युल्लासपूर्वकं समाचरिता
देवोत्थानैकादशी, भगवान् विष्णोः विशेषवार्षिकी पूजा सम्पन्ना



चातुर्मास्यस्य समापनं, महालक्ष्म्या सह भगवतः विष्णोः प्रबोधनपरम्परायाः निर्वहणम्।

हिमसंस्कृतवार्ताः- राघवनाथझा, पाटलिपुत्रम्। पाटलिपुत्रस्थे महावीरमन्दिरे शुक्रवासरे देवोत्थानैकादशी इति पावनः पर्वः पारम्परिकया श्रद्धया भक्त्या चोल्लासेन च समाचरितः। प्रतिवर्षमिव अस्मिन्नपि पावने अवसरे मन्दिरे भगवान् विष्णोः विशेषवार्षिकी पूजायाः आयोजनं कृतम्। मन्दिरस्य पूर्वदक्षिणकोणे विराजमानस्य भगवान् विष्णोः विग्रहस्य समक्षं सायंकाले षड्वादने विधिवत् पूजाऽर्चना विशेषधार्मिकानुष्ठानानि च सम्पन्नानि। अस्मिन्नवसरे मन्दिरस्य पुरोहितैः सह बहवो व्रतिनः श्रद्धापूर्वकम् अनुष्ठाने सहभागिनः अभवन्। पूजायां मन्दिरस्य सचिवः श्रीसायणकुणालः यजमानत्वं निर्वहितवान्।

विष्णोः प्रबोधनं च चातुर्मास्यसमापनस्य पर्व

सनातनधर्मे कार्तिकमासस्य शुक्लपक्षीया एकादशी तिथिः विशिष्टं धार्मिकम् आध्यात्मिकं च महत्त्वं वहति। इयं तिथिः देवोत्थानैकादशी, हरिबोधिन्येकादशी तथा प्रबोधिन्येकादशी इत्यादिभिः नामभिः अपि प्रसिद्धा अस्ति।

धार्मिकमान्यतानुसारम् आषाढमासस्य शुक्लपक्षीयायाम् एकादश्यां अर्थात् हरिशयन्येकादश्यां भगवान् विष्णुः क्षीरसागरे योगनिद्रां प्रविशति। ततः भाद्रपदमासस्य शुक्लपक्षीयायां पार्श्वपरिवर्तिन्येकादश्यां भगवान् विष्णुः पार्श्वपरिवर्तनं करोति तथा कार्तिकमासस्य शुक्लपक्षीयायाम् एकादश्यां देवोत्थानैकादश्यां च योगनिद्रायाः प्रबोधनं भवति।

एतेषां चतुर्णां मासानां कालावधिः चातुर्मास्यम् इति कथ्यते। परम्परानुसारम् अस्मिन् काले विवाहादीनां माङ्गलिककार्याणां तथा यात्रादीनां च आयोजनं विरमति। देवोत्थानैकादश्याः समागमेन चातुर्मास्यस्य समापनं भवति, पुनश्च माङ्गलिककार्याणाम् आरम्भः जायते।

अस्मिन् पावने पर्वणि सायंकाले तुलसीवृक्षस्य समीपे महालक्ष्म्या सह भगवान् विष्णोः विधिवत् पूजाऽर्चना कृता। महावीरमन्दिरे आयोजितेन अस्य वार्षिकधार्मिकानुष्ठानस्य माध्यमेन देवोत्थानैकादश्याः प्राचीनधार्मिकपरम्परायाः वैष्णवश्रद्धायाश्च विधिवत् निर्वहणं कृतम्।

युवानां महिलानां च नामाङ्कनाय विशेषः प्रयासः

मतदातृसूच्यां नामाङ्कनात् वञ्चितानां सर्वेषां पात्रनागरिकाणां, विशेषतः युवानां महिलानां च नामानि सूच्यां समावेशयितुं व्यापकप्रचारप्रसारः करणीयः इति सर्वेभ्यः जनपदनिर्वाचनाधिकारिभ्यः निर्देशाः प्रदत्ताः सन्ति।

अस्मिन् अभियाने मान्यताप्राप्तराजनैतिकदलानां मतदानकेन्द्रस्तरीय- प्रतिनिधीनां (बीएलए), पूर्ववर्तमानग्रामप्रधानानां, पार्षदानां, स्थानीय-स्वयंसेवकानां सहयोगः स्वीकरिष्यते। सामाजिक-सङ्गठनानामपि सहभागिता सुनिश्चित्य पात्रनागरिकेभ्यः अभियानस्य सूचना प्रापयिष्यते, येन अधिकाधिकाः नागरिकाः एतेषां विशेषाभियानदिवसानां लाभं प्राप्तुं शक्नुयुः।

अधिकारिभिः भविष्यति मतदेयस्थलानां निरीक्षणम्

विशेषाभियानदिवसेषु जनपदनिर्वाचनाधिकारी, उपजनपद- निर्वाचनाधिकारी, निर्वाचकनामावली-पञ्जीकरणाधिकारी, सहायकनिर्वाचकनामावली-पञ्जीकरणाधिकारिणः विभिन्नानि मतदेयस्थानानि भ्रमणं कृत्वा व्यवस्थानां निरीक्षणं करिष्यन्ति। अभियानस्य सञ्चालनकार्ये कस्मिन्नपि स्तरे शैथिल्यं न भवेत् इति जनपदनिर्वाचनाधिकारिणा सुनिश्चितं करिष्यते।

विशेषाभियानस्य समुचितपर्यवेक्षणाय मुख्यनिर्वाचनाधिकारी- कार्यालयस्य अधिकारिणः अपि विभिन्नेषु जनपदेषु क्षेत्रीयनिरीक्षणं करिष्यन्ति। - **मुख्यनिर्वाचनाधिकारीकार्यालयः,**

बिहारराज्ये २.२५ लक्षकोटिरूप्यकाणां निवेशप्रस्तावानां कृते सहमतिपत्राणां विनिमयः, एनटीपीसी, न्यूक्लियर पावर कॉर्पोरेशन च इत्यनयोः ७०-७० सहस्रकोटिरूप्यकाणां निवेशप्रस्तावः

अदानी, टोरेंट, ग्रीनको इत्यादिभिः प्रमुखैः औद्योगिकसंस्थानैः प्रदर्शिता रुचिः; ऊर्जाक्षेत्रे ११ सहस्रमेगावाट् विद्युत्प्राप्त्यर्थं सहमतिः

हिमसंस्कृतवार्ताः- राघवनाथ झा, पाटलिपुत्रम्।

बिहारराज्ये औद्योगिकविकासाय निवेशप्रवाहस्य च गतिवर्धनदिशि शुक्रवासरे महत्त्वपूर्णा पहलः कृता। मुख्यमन्त्रिणः सम्राट् चौधरीवर्यस्य उपस्थितौ पाटलिपुत्रस्य मौर्यहोटले उद्योगविभागेन ऊर्जाविभागेन च संयुक्तरूपेण आयोजिते 'उद्यमिभिः सह संवादः', 'सहमतिपत्राणां विनिमयसमारोहः' इति कार्यक्रमे समग्रतया २ लक्ष २५ सहस्रकोटिरूप्यकाणां निवेशप्रस्तावसम्बद्धानां समझौतापत्राणां विनिमयः सम्पन्नः। अस्यां निवेशप्रक्रियायां ऊर्जाक्षेत्रं, नवीकरणीयऊर्जा, परमाणुऊर्जा, विमाननं, विनिर्माणम् इत्यादिभिः औद्योगिकक्षेत्रैः सम्बद्धैः प्रमुखैः कम्पनीभिः संस्थाभिश्च सहभागिता कृता।

समारोहे मुख्यमन्त्री निवेशकान् उद्योगजगतः प्रतिनिधींश्च स्वागतीकृत्य अवदत् यत् बिहारराज्यम् औद्योगिकविकासाय पूर्णतया सज्जम् अस्ति। सः निवेशकेभ्यः बिहारराज्ये विश्वासं कर्तुं राज्यस्य विकासयात्रायां च सहभागिनः भवितुम् आह्वानम् अकरोत्।

एनटीपीसी, न्यूक्लियर पावर कॉर्पोरेशन च इत्यनयोः ७०-७० सहस्रकोटिरूप्यकाणां निवेशप्रस्तावाः

निवेशप्रस्तावेषु एनटीपीसी लिमिटेड, न्यूक्लियर पावर कॉर्पोरेशन ऑफ इण्डिया लिमिटेड च इत्यनयोः नामनी प्रमुखतया उल्लिखिते। उभाभ्यां संस्थाभ्यां पृथक्-पृथक् ७०-७० सहस्रकोटिरूप्यकाणां निवेशप्रस्तावाः समर्पिताः। एतदतिरिक्तम् अदानी हाइड्रो एनर्जी इत्यस्य द्वाभ्यां कम्पनीभ्यां प्रत्येकं ९,९०० कोटिरूप्यकाणां निवेशप्रस्तावः प्रदत्तः।

प्रमुखनिवेशप्रस्तावानां विवरणम् अधोलिखितम् अस्ति-

एनटीपीसी लिमिटेड- ७०,००० कोटिरूप्यकाणि।
न्यूक्लियर पावर कॉर्पोरेशन ऑफ् इण्डिया लिमिटेड- ७०,००० कोटिरूप्यकाणि।
फेडरेशन ऑफ एविएशन इण्डस्ट्री इन इण्डिया- १२,५०० कोटिरूप्यकाणि।
सीटीआरएलएस (CTRLS)- १०,००० कोटिरूप्यकाणि।
रेनवियन (रामकी समूहः)- १०,००० कोटिरूप्यकाणि।
अदानी हाइड्रो एनर्जी ७ लिमिटेड- ९,९०० कोटिरूप्यकाणि।
अदानी हाइड्रो एनर्जी १५ लिमिटेड- ९,९०० कोटिरूप्यकाणि।
टोरेंट एनर्जी स्टोरेज सॉल्यूशन्स प्राइवेट लिमिटेड- ७,६८४.९४ कोटिरूप्यकाणि।
ग्रीनको एनर्जीज प्राइवेट लिमिटेड- ५,४०० कोटिरूप्यकाणि।
एसएईएल इण्डस्ट्रीज लिमिटेड- ४,००० कोटिरूप्यकाणि।
सीपीए प्राइवेट लिमिटेड- ३,५०० कोटिरूप्यकाणि।
रश्मि मेटलर्जिकल इण्डस्ट्री लिमिटेड- ३,००० कोटिरूप्यकाणि।
राणा होल्डिंग लिमिटेड- ३,००० कोटिरूप्यकाणि।
बगमेनिया सेमीकॉन- २,००० कोटिरूप्यकाणि।
किविसा ऑर्गेनिक्स प्राइवेट लिमिटेड- १,२०० कोटिरूप्यकाणि।

२०४७ तमवर्षपर्यन्तं विकसितभारतनिर्माणे बिहारस्य महत्त्वपूर्णा भूमिका

मुख्यमन्त्री सम्राट चौधरी अवदत् यत् २०४७ तमे वर्षे यदा देशः स्वातन्त्र्यप्राप्तेः शतवर्षाणि पूरयिष्यति, तदा विकसितभारतस्य निर्माणे बिहारराज्यस्य महत्त्वपूर्णा भूमिका भविष्यति। राज्यसर्वकारस्य लक्ष्यं बिहारराज्यं देशस्य तीव्रतमम् औद्योगिकविकासं कुर्वत्सु राज्येषु अन्यतमं कर्तुम् अस्ति। निवेशार्थं प्राप्ताः प्रस्तावाः राज्यस्य प्रति उद्यमिनां निवेशकानां च वर्धमानं विश्वासं प्रतिपादयन्ति इति सः अवदत्।

मुख्यमन्त्री बिहारस्य ऐतिहासिकवैभवस्य उल्लेखं कुर्वन् अवदत् यत् प्राचीनकाले बिहारप्रदेशेन भारतवर्षाय स्वर्णयुगं प्रदत्तम्। अधुना आवश्यकता अस्ति यत् स्वकीयायाः ऐतिहासिकधरोहरायाः, प्रतिभायाः, प्राकृतिकसम्पदां च समुचितम् उपयोगं कृत्वा औद्योगिकस्य आर्थिकस्य च विकासस्य नूतना गाथा लिख्येत।

जलस्य जनसङ्ख्यायाश्च समस्याः सामर्थ्यरूपेण परिणेतुं प्रयासः


मुख्यमन्त्री अवदत् यत् बिहारराज्यस्य प्रमुखे द्वे आग्रहे स्तः- जलसमस्या जनसङ्ख्यावृद्धिश्च। अधुना एतयोः समस्ययोः राज्यस्य सामर्थ्यरूपेण परिवर्तनाय प्रयासः क्रियते। उत्तरबिहारस्य नद्यः निर्गच्छन्तीनां पङ्कमृत्तिकानां वैज्ञानिकप्रबन्धनाय निर्माणकार्येषु च तासाम् उपयोगस्य सम्भावनानां विषये कार्यं प्रचलति। एतदर्थं पङ्कनीतिः निर्मिता अस्ति। अनेन नदीषु पङ्कसञ्चयस्य समस्यायाः समाधानं भविष्यति, निर्माणकार्येभ्यः उपयोगिनः संसाधनाः अपि उपलब्धाः भविष्यन्ति। बाढिनियन्त्रणाय तटबन्धानाम् उन्नयनं सुव्यवस्थापनं च सहितम् अन्ये आवश्यकाः उपायाः क्रियन्ते।

१.८२ कोटिपरिवारेभ्यः प्रतिमासं १२५ यूनिट निःशुल्का विद्युत्

ऊर्जाक्षेत्रस्य योजनानाम् उल्लेखं कुर्वन् मुख्यमन्त्री अवदत् यत् विद्युत्क्षेत्रे प्रायः २३ सहस्रकोटिरूप्यकाणां अनुदानं प्रदीयते। राज्यस्य १.८२ कोटिपरिवारेभ्यः प्रतिमासं १२५ यूनिट् विद्युत् निःशुल्कतया प्रदीयते। राज्यस्य वर्धमानाम् ऊर्जावश्यकतां दृष्ट्वा प्रायः ११ सहस्रमेगावाट विद्युत्प्राप्त्यर्थं सहमतयः कृताः सन्ति। पर्याप्तायाः ऊर्जायाः उपलब्धता औद्योगिकविकासस्य निवेशस्य च गतिवर्धने महत्त्वपूर्णां भूमिकां निर्वक्ष्यति इति सः अवदत्।

१२ नवीननगरवसतिक्षेत्राणां निर्माणं, शिक्षायाः पर्यटनस्य च प्रोत्साहनयोजना

मुख्यमन्त्री अवदत् यत् बिहारस्य उत्पादान् राष्ट्रियैः अन्तरराष्ट्रीयैश्च विपणिभिः सह संयोजयितुं परिवहनस्य रसदव्यवस्थायाश्च विविधसाधनानां विकासः क्रियते। राज्ये द्वादश नवीननगरवसतिक्षेत्राणि विकसितुं योजना अस्ति। बिहारराज्यं शिक्षायाः प्रमुखं केन्द्रं कर्तुं बृहद्भ्यः शैक्षणिकसंस्थानेभ्यः राज्ये स्वकीयसंस्थानानि



स्थापयितुम् आग्रहः अपि क्रियते। सः बिहारराज्ये पर्यावरणपर्यटनस्य धार्मिकपर्यटनस्य च व्यापकाः सम्भावनाः सन्तीति उल्लेखयन् अवदत् यत् श्रीगुरुगोविन्दसिंहजीमहाराजेन, भगवता बुद्धेन सम्बद्धानां धार्मिकानाम् ऐतिहासिकानां च स्थलानां विकासेन सह मातुः सीतायाः जन्मभूमौ सीतामढ्याम् अपि भव्यनिर्माणकार्याणि विकासकार्याणि च क्रियन्ते। एतेन पर्यटनस्य विकासेन सह स्थानीयस्तरे रोजगारस्य आर्थिकक्रियाकलापानां च वृद्धिः भविष्यति।

३० दिवसेषु निवेशप्रस्तावानाम् अनुमोदनम्, ३१ तमे दिने स्वतः स्वीकृतेः प्रावधानम्

निवेशकेभ्यः आश्वासनं ददन् मुख्यमन्त्री अवदत् यत् राज्ये व्यवसायसुगमतायाः व्यवस्थायाः अधिकं सुदृढीकरणं क्रियते। निवेशसम्बद्धानां प्रस्तावानां त्रिंशद्दिनाभ्यन्तरे अनुमोदनं प्रदातुं व्यवस्था क्रियते। निर्धारितावधौ अनुमोदनं न प्राप्ते सति एकत्रिंशत्तमे दिने प्रस्तावः स्वतः स्वीकृतः इति मन्यते- एतादृशं प्रावधानं क्रियते। उद्यमिनः अनावश्यकप्रक्रियाभ्यः मुक्ताः कृत्वा निवेशानुकूलं वातावरणं निर्मातुमेव सर्वकारस्य उद्देश्यम् अस्ति।

पञ्चवर्षेषु एककोटिजनानां कृते रोजगारावसरप्रदानस्य लक्ष्यम्

मुख्यमन्त्री रोजगारस्य महिलासशक्तीकरणस्य च लक्ष्याणाम् उल्लेखं कुर्वन् अवदत् यत् विगतेषु षट्सु वर्षेषु त्रयोदशलक्षं (१३ लक्षं) सर्वकारीयानि पदानि पूरितानि, द्विकोटिजनानां कृते रोजगारस्य अवसराः उपलब्धाः कृताः। आगामिषु पञ्चसु वर्षेषु एककोटिजनानां कृते रोजगारस्य सर्वकारीय-सेवानियोजनस्य च अवसरान् प्रदातुं लक्ष्यम् निर्धारितम् अस्ति। एतदतिरिक्तम् एककोटिपरिवारान् उद्यमिनः कर्तुम् एककोटिमहिलाः आर्थिकदृष्ट्या सशक्ताः कृत्वा 'लखपतिदीदी' इति योजनायाः अन्तर्गतं समावेशयितुं लक्ष्यम् अस्ति।

मुख्यमन्त्रिणः कथनानुसारम् अद्यावधि पञ्चाशल्लक्षं महिलाः 'लखपतिदीदी' इति स्थितिं प्राप्तवत्यः। सः अवदत् यत् बिहारराज्ये उद्योगानां विकासाय अनुकूलं वातावरणम्, पर्याप्तानि संसाधनानि, कुशलं मानवबलं विशालं विपणिक्षेत्रं च उपलब्धम् अस्ति। निवेशकैः सह सहभागितायां राज्यं औद्योगिकविकासस्य नूतनं केन्द्रं कर्तुं सर्वकारः प्रतिबद्धः अस्ति।



"अकबर बीरबल कथा"
"कः विद्वान्?"

बादशाह अकबरस्य राजसभायां देश-विदेशतः विद्वांसः आगच्छन्ति स्म। स्वकला अकबरस्य पुरतः दर्शयित्वा उपहारं स्विकरणीयं एव विदुषां कार्यं आसीत्। एकदा एकः विद्वान् राजसभायाम् आगतः। अकबरः तस्य आदरं कृतवान्। आगमनस्य कारणं पृष्टवान्। अहं भवतः राजसभायां विदुषः कानिचित प्रश्नानि प्रक्ष्यामि यदि उत्तराणि सम्यक् अस्ति चेत् तस्मै अहं मम हस्तस्य कनककङ्कणं दास्यामि। विदुषः एतादृशी भाषा श्रुत्वा अकबरः मन्दं-मन्दं हसितः। पृच्छतु प्रश्नान्! अकबरस्य अनुमतिनन्तरं तेन प्रथमः प्रश्नः पृष्टः।

{१} अहं सर्वत्र अस्मि किन्तु मम निवासस्थाने कोऽपि प्रवेशं कर्तुं असमर्थः। अहं सागरे, आकाशे, भूमौ सञ्चरामि। अहं सर्वत्र अस्मि किन्तु कोऽपि मां द्रष्टुं न शक्नोति, मां गृह्णीतुं सर्वे हि असमर्थः, मम विना जगतः रुद्धः भवति। तर्हि कोऽहम्?

प्रश्न कठिनं अस्ति। सर्वः सभासदः परस्परस्य मुखावलोकनं करोति। सर्वत्र शान्तता प्रसृताः। तदा बीरबलः उत्थाय प्रत्युवाच- अस्य प्रश्नस्य उत्तरं "वायुः" अस्ति। विद्वान् उत्तरं बाढम् इति अवदत्। तदनन्तर सः अन्यं प्रश्नं पृष्टवान्। द्वितीयः प्रश्नः किञ्चित् कठिनम् अस्ति।{२} अहं सर्वेषाम् उपस्थितोस्मि, मम विना न कोपि जीवति, मम अमर्याद सत्ता अस्ति। तर्हि अहं एकस्मिन् स्थाने प्रतिबद्धः अस्मि। यदा मम मित्रं माम साहाय्यं करोति तदा अहं बर्हिगच्छामि। तर्हि कोऽहम्? सभासदाः मौनेन तिष्ठाः सर्वत्र पुनः शांतता प्रसृता। विद्वान् चिन्तितम्– अहं विजयी अस्मि, मम प्रश्नस्य उत्तरं दातुं सर्वैः असमर्थाः। बीरबलः तम् अवलोकितवान् तस्मिन्क्षणे पुनः बीरबलः उत्थाय प्रत्युवाच– अस्य प्रश्नस्य उत्तरोऽस्ति 'मनः' इति। उत्तरं निर्दोषम् अस्ति। यथार्थः उत्तरः बिरबलेन दत्तः। विद्वान् अतीवः प्रमुदितः। तत्क्षणेव सः स्वहस्तात् कङ्कणं बिरबलाय अयच्छत्। राजसभायां निर्गतः।

डॉ. वर्षा प्रकाश टोणगांवकर,
पुणे, महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य प्रथमा विचित्रा वार्ता मुम्बा-देवी-नगरात् अस्ति। तत्र एकया वृद्धया महिलया चत्वारिंशद्वर्षं यावत् एकाकिन्या निवासः कृतः। अधुना सा मृता। तस्याः द्वे पुत्र्यौ स्तः, परं ते अज्ञाते स्तः। अतः प्रतिवेशिभिः वार्तापत्रे तस्याः चित्रं दत्तम्। तैः पुत्र्योः अन्वेषणाय सूचना अपि प्रकाशिता।

काव्या- नमस्ते नन्दिनि। एषा वार्ता अतीव दुःखदा अस्ति। एकाकिजीवनं कष्टकरं भवति। अधुना द्वितीयां वार्तां शृणु। एकेन युवकेन स्वस्य वाग्दानं त्यक्तम्। तस्य वध्वाः सर्वकारीयं कार्यम् अस्थायि इति तेन ज्ञातम्। स्थायिकार्यस्य अभावात् सः विवाहः न जातः। अस्मिन् विषये अन्तर्जाले महती चर्चा जाता।

नन्दिनी- सत्यम्। विवाहे कार्यम् अपेक्ष्य विश्वासः मुख्यः अस्ति। इदानीं तन्त्रज्ञानस्य वार्ता अस्ति। क्वाल्काम्- संस्थया बहवः कर्मचारिणः निष्कासिताः। तेषु अधिकतमाः भारतदेशात् अपसारिताः। संस्था-प्रमुखेण कथितं यत् अल्प-कार्यक्षमतया ते त्यक्ताः। परं कर्मचारिभिः पक्षपातः आरोपितः।

काव्या- एतत् अनुचितम् अस्ति। कार्यक्षेत्रे न्यायः एव उचितः। अधुना चतुर्थी वार्ता कृत्रिम-मेधायाः अस्ति। अमेरिकादेशस्य एरिजोना-राज्ये अधिकारिभिः अन्वेषणम् आरब्धम्। प्रमुख-कृत्रिम- मेधा- संस्थानां विषये एतत् अन्वेषणं प्रवृत्तम्। धन-व्यवहारे स्वतन्त्र-यन्त्राणि प्रयुक्तानि। तानि यन्त्राणि अनियन्त्रितानि जातानि इति शङ्का उत्पन्ना। अतः वित्त-संस्थाभिः चिन्ता व्यक्तीकृता।

नन्दिनी- सत्यम्। अनियन्त्रितं तन्त्रज्ञानं भयावहं भवति। अद्य आवाभ्यां चतस्रः महत्त्वपूर्णाः वार्ताः चर्चिताः। तव सहयोगाय कृतज्ञताम् अर्पयामि तुभ्यम्। शुभं भूयात्।

काव्या- सत्यम्, नूतनतन्त्रज्ञाने सावधानता आवश्यकी एव। अहमपि कृतज्ञताम् अर्पयामि तुभ्यम्। पुनर्मेलिष्यामः।

व्याकरणचिन्तनम्- १५



असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

संस्कृते मुख्य-तद्धित-प्रत्ययविधेः पुनः स्मरणम्-

१. वस्तुतः तद्धित-प्रत्ययः कः इति प्रथमतः सम्यक् ज्ञातव्यम्?

उत्तरम्- प्रातिपदिकात् परः यः प्रत्ययः भवति, सः तद्धित-प्रत्ययः कथ्यते?

धातोः परः चेत्- कृत्-प्रत्ययः।

प्रातिपदिकात् परः एव तद्धित-प्रत्ययः भवति। अर्थात्-प्रातिपदिकम् + तद्धित-प्रत्ययः= तद्धितान्त-पदम् इति। यथा-

बुद्धि + मतुप्= बुद्धिमत् इति भवति। एतत्पदं विशेषणम्, अतः त्रिषु लिङ्गेषु सम्भवति। यथा - बुद्धिमान्/ बुद्धिमती/ बुद्धिमत् इति।

२. मुख्य-तद्धित-प्रत्ययाः - पञ्च वर्गाः-

क) मतुप्-अर्थीयाः - 'अस्य अस्ति' इत्यर्थे ।

मतुप्- तदस्यास्त्यस्मिन्निति मतुप्- बुद्धिमान्, धनवान्।

वतुप् - युष्मदस्मद्भ्यां वतुप् त्वावान्, मावान्।

इतच् - तारकादिभ्य इतच्- पुष्पितः, फलितः।

लच् - मांसलः, चञ्चलः,

इनि - इनिठनौ- ज्ञानी, धनी।

वनिप् - छन्दसि वनिप्- शक्तीवान्, मघवान्, (वैदिकः)

विनि- अस्मायामेधास्रजो विनिः - मेधावी, मायावी।

ख) अपत्य-अर्थीयाः - 'अस्य पुत्र / सन्तानार्थे अण् –

वसिष्ठ + अण् = वासिष्ठः।

इञ् - दशरथ + इञ् = दाशरथिः।

ढक् - कुरु + ढक् = कौरवेयः।

यञ् - गर्ग + यञ् = गार्ग्यः।

फिञ् –

कुरु + फिञ् = कौरवायणः।

वात्स्य + आयन = वात्स्यायनः।

ग) भावार्थे -

त्व - गुरु + त्व = गुरुत्वम्।

तल् - गुरु + तल् = गुरुता।

ष्यञ् - गुरु + ष्यञ् = गौरवम्।

अण् - शिशु + अण् = शैशवम्।

इमनिच् - गुरु + इमनिच् = गरिमा।

तसिल् - ग्राम + तसिल् = ग्रामतः (पञ्चम्यर्थे)

घ) सम्बन्ध-अर्थीयाः -

अण् - शिव + अण् = शैवः। वैष्णवः,।

इक - धर्म + इक = धार्मिकः।

ईय - देश + ईय = देशीयः,

य - ग्राम + य = ग्राम्यः।

ङ) अन्ये मुख्याः -

तरप् - तर - लघुतरः, गुरुतरः।

तमप् - तम - लघुतमः, गुरुतमः।

ईयसुन् - ईयस् - लघीयान्, गरीयान्।

इष्ठन् - इष्ठ - लघिष्ठः, गरिष्ठः।

मयट् - मय - मृन्मयम्, स्वर्णमयम्।

वत् - वत् - रामवत्, पुत्रवत्।

शस् - शः - द्विशः, त्रिशः।

धा - द्विधा, त्रिधा।

तसिल् - तः - ग्रामतः, सर्वतः।

त्रल् - त्र - सर्वत्र, उभयत्र।

था - सर्वथा, अन्यथा।

स्मरणीयम् -

मतुप्- इतच्- इनि- वनिप्- त्व- तल्- ष्यञ्- इमनिच्- अण्- इञ्- ढक्- यञ्- फिञ्- तर- तम- ईयस्- इष्ठन्- इक्- ईय- मयट्- वत्- शस्, इत्येते मुख्यास्तद्धिताः स्मृताः।

इति 'व्याकरणचिन्तनम्' इति धारावाहिके यथाज्ञानं प्रस्तुतः तद्धित-प्रत्ययविधिः सम्पूर्णः।

(कृत्-प्रत्ययविधिः अस्यानन्तरम् आरप्स्यते)